

पूर्वाचार्यकृत

# वेदि व मंदिर प्रतिष्ठा



* संग्राहक *

अष्टांग निमित्तज्ञ, मंत्रविद्या चक्रवर्ती जगद्गुरू ग. गणधराचार्य कुन्थुसागर

प.पू. ग. ग. जगद्गुरु श्री कुंथुसागरजी गुरुदेव के ७६ वे अमृत महोत्सव
के उपलक्ष्य में प्रकाशित



ॐ ह्री धरणेन्द्र पद्मावति सहित श्री पार्श्वनाथाय नमः

# पूर्वाचार्यकृत वेदि व मंदिर प्रतिष्ठा


✻ संग्रह कर्ता ✻

अष्टांग निमितज्ञ, मंत्रविद्या चक्रवर्ती

जगद्गुरू ग.गणधराचार्य कुन्थुसागर

✻ संपादक ✻

मुनिश्री सुयशगुप्त जी

मुनिश्री चंद्रगुप्त जी

✻ शुद्धि व लिपिकर्ता ✻

गणिनी आर्यिका मुक्तीमतिजी माताजी



✻ पुण्यार्जक व प्रकाशक ✻

जयुदीदी व पुनमदीदी

श्री क्षेत्र कुन्थुगिरी

आनन्दवन, जिल्हा कोल्हापुर (महाराष्ट्र)

## * दो शब्द *

यह पुस्तक वेदी व मन्दिर प्रतिष्ठा की है । इसका पुन: प्रकाशन हो रहा इसका संग्रह  व सम्पादन मै ही कर रहा हूँ । पहले एक बार यह पुस्तक छप चुकी है। वे सभी पुस्तके समाप्त हो चुकी है इस पुस्तक मे मूल विषय मंगलाष्टक सकलीकरण यज्ञ दिक्षा, विधान, मंडप प्रतिष्ठा विधान, घट यात्रा विधी, पंचामृत अभिषेक व शांतिधारा मृतिका संग्रह विधी अंकुरारोपण विधी, झंडारोहण विधी, धाम संप्रोक्षण, मंदिर व वेदी प्रतिष्ठा, ध्वजारोहण, जिनालय पर कलशारोपण, आदि सारे विधी विधान पूर्वक विधीया दी है इन सब मे ३ दिन का उत्सव रखा जाता है । पहले दिन शांति चक्र विधान सकलीकरण आदि किया जाता है। दुसरे दिन देवागम विधी जल यात्रा मंदिर व वेदि की प्रतिष्ठा की जाती है। तीसरे दिन वेदी पर भगवान विराजमान हवन विधी रथोत्सव विधी करके उत्सव समाप्त कर दिया जाता है। इसलिए इस पुस्तक का नाम वेदि प्रतिष्ठा व मंदिर प्रतिष्ठा रखा है ।

इस प्रतिष्ठा में शांतिमंत्र का १२,५०० जाप करना पडता है। दशांग आहुति करनी पडती है एक ही पुस्तक में मंदिर प्रतिष्ठा व वेदी प्रतिष्ठा मन्दिर पर कलशा रोहण ध्वजा रोहण, शिखर प्रतिष्ठा आदि सारे विधी विधान लिख दिये है। इस एक पुस्तक से प्रतिष्ठाचार्य बहोत कुछ विधी विधान कर सकते है इन सब बातो को ध्यान में रखते हुये मैने यह संग्रह किया है। पहेले पुस्तक छपी थी उसमें अशुद्धियाँ बहुत थी, उन अशुद्धी को निकालने के लिये ग. आर्यिका मुक्ति मति माताजी का प्रयत्न सराहनीय है। उन्होंने पुस्तक का पुरा शुद्धीकरण कर दिया है।  उसका जैसा का तैसा प्रकाशन कर रहे है। सब लोग शुद्धता से पढकर लाभ उठाये। माताजी को मेरा आर्शिवाद भक्तों को मेरा आर्शिवाद शुद्धता पूर्वक विधी विधान करने वालो को मेरा आर्शिवाद

इस पुस्तक का प्रकाशन क्षेत्र कुंथुगिरी से कर रहे हैं। पुस्तक की प्राप्ती क्षेत्र से होगी।

**– प.पू. जगद्गुरू अष्टांग निमितज्ञ मंत्रविद्या चक्रवर्ती गणाधिपती गणधराचार्य कुन्थुसागर**

## अनुक्रमणिका


| | | |
|---|---|---|
| १) | जाप्य मंत्र | ५ |
| २) | मंगलाष्टक | ६ |
| ३) | सकलीकरण | ८ |
| ४) | महर्षिपर्युपासनम् | १२ |
| ५) | स्वस्त्ययन विधानम् | १४ |
| ६) | यज्ञदीक्षा | १५ |
| ७) | भूमिशोधनम् | १८ |
| ८) | पुण्याहवाचन | २० |
| ९) | शांतिधारामंत्र | २३ |
| १०) | दर्भस्थापनम् | २५ |
| ११) | मंडपप्रतिष्ठाविधानम् | २७ |
| १२) | कुमुदादि द्वारपालानुकूलमन | २८ |
| १३) | पूजामुखविधि | २९ |
| १४) | पंचामृताभिषेक | ३१ |
| १५) | मृत्तिकासंग्रह विधि | ३९ |
| १६) | अंकुरारोपण विधि | ४६ |
| १७) | झंडारोहण | ६१ |
| १८) | धामसंप्रोक्षणम् | ६९ |
| १९) | जिनालय पूजा | ७० |
| २०) | प्रतिष्ठा तिलक | ७३ |
| २१) | दर्भस्थापन विधि | ७६ |
| २२) | ८१ घटों से वेदी शुद्धि मंत्र | ७७ |
| २३) | दिग्बन्धन | ८० |
| २४) | विनायक यंत्र पूजा | ८२ |

| | | |
|---|---|---|
| २५) | महर्षि पर्युपासनम् | ८६ |
| २६) | जिनेन्द्र प्रतिमा स्थापना मंत्र | ९१ |
| २७) | व्रत समापन विधि | ९२ |
| २८) | ध्वजा बनाने की विधि | ९२ |
| २९) | नयनोन्मीलन मंत्र | ९५ |
| ३०) | कलशार्चनम | १०० |
| ३१) | मंडप वेदी भूषणम् | १०९ |
| ३२) | यंत्र, नक्शा चित्र | ११० |
| ३३) | मातृका यंत्र | ११२ |
| ३४) | अंतिम प्रशस्ति | ११९ |

**ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा मम सर्वोपद्रव शांतिं कुरू कुरू स्वाहा।**

(सवालाख या साढे बारह हजार जाप्य करावें ।)

**ॐ ह्रीं अ सि आ उ सा नमः ।**

(सवालाख जाप्य करें ।)

**ॐ ह्रीं अर्हंतसिद्धाचार्योपाध्यायसर्वसाधुभ्यो नमो नमः ।**

(सवालाख या साढे बारह हजार जाप्य करें ।)

**ॐ ह्रीं श्री धरणेन्द्र पद्मावतीसहित पार्श्वनाथाय नमः ।**

(सवालाख या साढे बारह हजार जाप्य करें ।)

**ॐ ह्रीं पद्मावती देव्यै नमः ।**

(सवालाख या साढे बारह हजार जाप्य करें ।)

**ॐ पंचक्षेत्रपालाय मम सर्वकार्यसिद्धिं कुरू कुरू स्वाहा ।**

(सवालाख या साढे बारह हजार जाप्य करें ।)

**ॐ ह्रीं श्रीं अर्हं नमः** ।(सवालाख जाप्य करें ।)

**ॐ ह्रीं श्रीं क्लीं महालक्ष्म्यै नमः** (सवा लाख जाप्य)

**ॐ पार्श्वनाथाय ह्रीं नमः ।** (सवा लाख जाप्य)

**ॐ ह्रीं चतुर्विंशति तीर्थंकरेभ्यो नमः ।** (सवा लाख जाप्य)

**ॐ ह्रीं श्री कलिकुंडाधिपतये नमः ।** (सवा लाख जाप्य)

**ॐ ह्रां ह्रिं ह्रुं ह्रूं ह्रें ह्रैं ह्रौं ह्रः अ सि आ उ सा सम्यग्दर्शन ज्ञान चारित्रेभ्यो ह्रीं नमः स्वाहा ।**

(सवालाख या साढे बारह हजार जाप्य)

**(इति प्रतिष्ठादि विधि विधानों में करने योग्य जाप्य)**

# अथ मंगलाष्टकम्

– शार्दूल –

श्रीमन्नम्रसुरासुरेन्द्रमुकुट–प्रद्योतरत्नप्रभा,
भास्वत्पादनखेन्दवः प्रवचनाम्भोधीन्दवः स्थायिनः।
ये सर्वे जिनसिद्धसूर्यनुगतास्ते पाठकाः साधवः,
स्तुत्या योगिजनैश्च पञ्चगुरवः कुर्वन्तु मे (ते) मङ्गलम्।।१।।

सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनं,
मुक्तिश्रीनगराधिनाथजिनपत्युक्तोऽपवर्गप्रदः।
धर्मः सूक्तिसुधा च चैत्यमखिलं चैत्यालयः श्र्यालयं,
प्रोक्तं च त्रिविधं चतुर्विधममी कुर्वन्तु मे (ते) मङ्गलम्।।२।।

नाभेयादिजिनाधिपास्त्रिभुवनख्याताश्चतुर्विंशतिः,
श्रीमन्तो भरतेश्वरप्रभृतयो ये चक्रिणो द्वादश।
ये विष्णु–प्रतिविष्णु–लाङ्गलधराः सप्तोत्तराः विंशति–
स्त्रैकाल्ये प्रथितास्त्रिषष्ठिपुरुषाः कुर्वन्तु मे (ते) मङ्गलम्।।३।।

देव्योऽष्टौ च जयादिका द्विगुणिता विद्यादिका देवताः,
श्री तीर्थमरमातृकाश्च जनका यक्षाश्च यक्ष्यस्तथा।
द्वात्रिंशत्त्रिदशाधिपास्तिथिसुरा दिक्कन्यकाश्चाष्टधा,
दिक्पाला दश चैत्यमी सुरगणाः कुर्वन्तु मे (ते) मङ्गलम्।।४।।

ये सर्वौषधऋद्धयः सुतपसां वृद्धिङ्गताः पञ्च ये,
ये चाष्टाङ्गमहानिमित्तकुशला येऽष्टौविधाश्चारणाः।
पञ्चज्ञानधरास्त्रयोऽपि बलिनो ये बुद्धिऋद्धीश्वराः,
सप्तैते सकलार्चिता गणभृतः कुर्वन्तु मे (ते) मङ्गलम्।।५।।

कैलासे वृषभस्य निर्वृतिमही वीरस्य पावापुरे,
चम्पायां वसुपूज्यसज्जिनपतेः सम्मेदशैलेऽर्हताम्।

शेषाणामपि चोर्जयन्तशिखरे नेमीश्वरस्यार्हतो,
निर्वाणावनयः प्रसिद्धविभवाः कुर्वन्तु मे (ते) मङ्गलम्।।६।।

ज्योतिर्व्यन्तरभावनामरगृहे मेरौ कुलाद्रौ तथा,
जम्बूशाल्मलिचैत्यशाखिषु तथा वक्षाररूप्याद्रिषु।
इष्वाकारगिरौ च कुण्डलनगे द्वीपे च नन्दीश्वरे,
शैले ये मनुजोत्तरे जिनगृहाः कुर्वन्तु मे (ते) मङ्गलम्।।७।।

यो गर्भावतरोत्सवो भगवतां जन्माभिषेकोत्सवो,
यो जातः परिनिष्क्रमेण विभवो यः केवलज्ञानभाक्।
यः कैवल्यपुरप्रवेशमहिमा सम्भावितः स्वर्गिभिः,
कल्याणानि च तानि पञ्च सततं कुर्वन्तु मे (ते) मङ्गलम्।।८।।

इत्थं श्रीजिनमङ्गलाष्टकमिदं सौभाग्यसम्पत्प्रदं,
कल्याणेषु महोत्सवेषु सुधियस्तीर्थमराणामुषः।
ये शृण्वन्ति पठन्ति तैश्च सुजनैर्धर्मार्थकामान्विता,
लक्ष्मीराश्रयते व्यपायरहिता निर्वाणलक्ष्मीरपि।।९।।
।। इति श्री मङ्गलाष्टकस्तोत्रम् ।।

– स्रग्धरा –

आकाशं मूर्त्यभावाद धकुलदहनदग्निरूर्वी क्षमाप्त्या ।
नैसंग्याद्वायुरापः प्रगुणसमतया स्वात्मनिष्ठैः सुयज्वा ।।
सोमः सौम्यत्वयोगाद्रविरिति च विदुस्तेजसःसन्निधानात् ।
विश्वात्मा विश्वचक्षुर्वितरतु भवतां मंगलं श्रीजिनेशः ।।९।।

– शार्दूल –

यः कर्त्ता जगतां यमेक पुरूषं भव्याः समाचक्षते ।
येनादेशि हिताहितं मुनिजना यस्मै नमस्कुर्वते ।।
यस्माद्वेदपरंपरा समुदिता श्रीर्यस्य नित्यास्पदा ।
यस्मिन्नैव जगत् स्थितं स जिनपो निःश्रेयसायास्तु वः ।।१०।।

इत्थं श्रीजिनमङ्गलाष्टकमिदं सौभाग्यसम्पत्प्रदं,
कल्याणेषु महोत्सवेषु सुधियस्तीर्थमराणामुषः।
ये श्रृण्वन्ति पठन्ति तैश्च सुजनैर्धर्मार्थकामान्विता,
लक्ष्मीराश्रयते व्यपायरहिता निर्वाणलक्ष्मीरपि।।११।।

– अनुष्टुप –

मंगलं भगवानर्हन, मंगलं भगवान् जिनः ।
मंगलं प्रथमाचार्यो, मंगलं वृषभेश्वरः ।।१२।।

मंगलं प्रथमं लोके, उत्तमं शरणं जिनं ।
नत्वायमर्हतः पूजाक्रमस्याद्विधिपूर्वकं ।।१३।।

णमो अरिहंताणं । णमो सिद्धाणं । णमो आइरियाणं ।
णमो उवज्झायाणं । णमो लोए सव्व साहूणं ।।
एसो पंच णमोकारो, सव्वपावप्पणासणो ।
मगंलाणं च सव्वेसिं, पढमं होइ मंगलम् ।।

## * अथ सकलीकरणम् *

– अनुष्टुप –

दृष्टे मृष्टे भुविन्यस्ते संनिविष्टः सुविष्टरे ।
समीपस्थार्चनाद्रव्यो मौनमाकर्मिकं दधे ।।

। ú d (जमीनपर जल छिडके ।)

ॐ ह्रीं क्ष्वीं आसनं निक्षिपामि स्वाहा । (आसन बिछावें)

ॐ ह्रीं ह्युं ह्युं णिसिहि आसने उपविशामि स्वाहा । (आसनपर बैठे)

ॐ ह्रीं मौनस्थिताय स्वाहा ।

(पूजा के शब्द बोलने के सिवाय अन्य वार्तालाप हेतु मौन रखें ।)

शोधये सर्वपात्राणि पूजार्थानपि वारिभिः ।

**समाहितो यथाम्नायं करोमि सकलीक्रियाम् ।।**

**ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते श्रीमते पवित्रतरजलेन पात्रशुद्धिं करोमि स्वाहा** (पूजा के पात्रोंपर जल छिडके ।)

**ॐ ह्रीं अर्हं झ्रौं वं मं हं सं तं पं झ्वीं क्ष्वीं हं सः अ सि आ उ सा समस्त तीर्थ पवित्र जलेन शुद्ध पात्रनिक्षिप्त पूजाद्रव्याणि शोधयामि स्वाहा ।**

(सामग्री पूजा की शोधन करें अर्थात् जल छिडकें)

अमृतस्नान

**गुरूमुद्राग्रभूः झं वं व्हः पोहोभ्योऽमृतं स्वकैः ।**
**स्रवद्भिः सिच्यमानं स्वं ध्याये मंत्रमिमं पठन् ।।**

**ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्त्रावय स्त्रावय सं सं क्लीं क्लीं ब्लूं ब्लूं द्रां द्रां द्रीं द्रीं द्रावय द्रावय सं हं झं झ्वीं क्ष्वीं हं सः स्वाहा**

**(अमृतप्रोक्षणम्)**

(गुरूमुद्रा – पंचगुरूमुद्रा बनाकर उनके अग्रभाग में **'झं वं व्हः पः हः'** इन बीजाक्षरों को लिखकर वह मुद्रा मस्तकपर रखकर मंत्र पढते हुए चिंतन करे कि इन अक्षरों से अमृतप्रवाह निकलता हुआ मेरे सर्वांग को सिंचित कर रहा है । मस्तकपर मंत्रितजल छिडके ।)

– वसंततिलका –

**शून्याक्षरादि गुरू पंचपदानकीय ।**
**स्याद्यंगुलीत्रितय पर्वसुचाग्रभागे ।।**
**अंगुष्ठ तर्जनिकया क्रमशः कराभ्याम् ।**
**विन्यस्त हस्तयुगलं मुकुली करोमि ।।**

अंगुलियोंमे मंत्र न्यास करना – दोनों हाथोंकी कनिष्ठा आदि अंगुलियोंपर मूलभागसे लेकर अग्रभागपर्यंत तीनों रेखाओंपर क्रमसे **पोरोंपर** मंत्र लिखें ।

अंगन्यास विधि

| | | |
|---|---|---|
| कनिष्ठा पर | – | ॐ ह्रां णमो अरिहंताणं स्वाहा । |
| अनामिका पर | – | ॐ ह्रीं णमो सिद्धाणं स्वाहा । |

मध्यमा पर - ॐ हूं णमो आइरियाणं स्वाहा ।

तर्जनी पर - ॐ ह्रौं णमो उवज्झायाणं स्वाहा ।

अंगूठे पर - ॐ ह्रः णमो लोए सव्व साहूणं स्वाहा ।

इन मंत्रों को चंदन से लिखकर पुनःउपर्युक्त श्लोक बोलते हुए दोनों हाथ मिलावें (मंत्र लिखित दोनों हाथों को मिलाकर दोनों अंगूठे ऊपर करके उनसे आगे कथित मंत्र बोलते हुए उन-उन स्थानों का स्पर्श करें ।)

ॐ ह्रां णमो अरिहंताणं स्वाहा । ह्रदये. (दोनों अंगुठों से ह्रदय का स्पर्श करें)

ॐ ह्रीं णमो सिद्धाणं स्वाहा । ललाटे (ललाट का)

ॐ हूं णमो आइरियाणं स्वाहा । शिरसो दक्षिणे (सिर के दाहिने)

ॐ ह्रौं णमो उवज्झायाणं स्वाहा । शिरसो अपर भागे (सिर के पीछे)

ॐ ह्रः णमो लोए सव्वसाहूणं स्वाहा । शिरसो वामे (सिर के बायें)

**पुनः इन्हीं मंत्रों को बोलते हुए क्रम से स्पर्श करें ।**

ॐ ह्रां णमो अरिहंताणं स्वाहा । (ललाट का)

ॐ ह्रीं णमो सिद्धाणं स्वाहा । (सिर के मध्य का)

ॐ हूं णमो आइरियाणं स्वाहा । (सिर के दायें)

ॐ ह्रौं णमो उवज्झायाणं स्वाहा । (सिर के पीछे)

ॐ ह्रः णमो लोए सव्वसाहूणं स्वाहा । (सिर के बायें)

**तथा वामप्रदेशिन्यां न्यस्य पंचनमस्कृतीः ।**

**पूर्वादिदिक्षु रक्षार्थं दशस्वपि निवेशयेत् ।।**

(बायें हाथ की तर्जनी अंगुली में ''अ सि आ उ सा'' लिखकर उसे सीधी करके नीचे लिखे मंत्रोंसे क्रमशः उन – उन दिशाओं को दिखाता जावे ।)

ॐ ह्रां णमो अरिहंताणं । पूर्वस्यां दिशि ।

ॐ ह्रीं णमो सिद्धाणं । अग्नेयां दिशि ।

ॐ हूं णमो आइरियाणं । दक्षिणस्यां ।

ॐ ह्रौं णमो उवज्झायाणं । नैऋत्यां ।

ॐ ह्रः णमो लोए सव्वसाहूणं । पश्चिमायां ।

ॐ ह्रां णमो अरिहंताणं । वायव्यां ।
ॐ ह्रीं णमो सिद्धाणं । उत्तरस्यां ।
ॐ ह्रूं णमो आइरियाणं । ऐशान्यां ।
ॐ ह्रौं णमो उवज्झायाणं । अधरस्यां ।
ॐ ह्रः णमो लोए सव्वसाहूणं । ऊर्ध्वायां ।

इन दसों दिशाओं में अंगुली दिखाते हुए मंत्र बोलते हुए दश दिशाओं का बंधन करें ।

(इस तरह सकलीकरणसे अपने शरीर को कवच पहनाकर संपूर्ण इष्ट – पूजादि मंत्रादि क्रियाओं को करते हुए पूजक किसी भी विघ्न से बाधित नहीं होता है ।

। इति दिग्बंधनम् ।

## परमात्म ध्यान मंत्र

**ॐ ह्रां णमो अरिहंताणं अर्हद्भ्यो नमः ।**
**ॐ ह्रीं णमो सिद्धाणं सिद्धेभ्यो नमः ।**
**ॐ ह्रूं णमो आइरियाणं आचार्येभ्यो नमः ।**
**ॐ ह्रौं णमो उवज्झायाणं उपाध्यायेभ्यो नमः ।**
**ॐ ह्रः णमो लोए सव्वसाहूणं लोके सर्वसाधुभ्यो नमः ।**

(इस मंत्र का २१ बार जाप दे )

**– वंशस्थ –**

**जिनेन्द्र पादार्चित सिद्ध शेषया ।**
**सिद्धार्थ दूर्वायव चंदनाक्षतान् ।।**
**उपासकानामपि मुर्ध्नि निक्षिपन् ।**
**करोमि रक्षां मम शांतिकानाम् ।।**

ओं नमोऽर्हते सर्वं रक्ष रक्ष हूं फट् स्वाहा ।

इस मंत्र को पढकर पीली (सफेद) सरसों, दुर्वा, अक्षत, पुष्पों को सात बार मंत्रित कर सभी पूजक आदि के मस्तक पर क्षेपण करें ।

**ओं हूं फट् किरटिं घातय घातय, पर विघ्नान् स्फोटय स्फोटय सहस्त्र खंडान् कुरू कुरू पर विद्यां छिंधि छिंधि, पर मंत्राण भिंधि भिंधि क्षः फट् स्वाहा ।**

(इस मंत्र से सफेद सरसों मंत्रित कर सर्व विघ्नों को उपशमित करने के लिए सर्व दिशाओं में सर्वत्र क्षेपण करें । )

। इति सकलीकरणविधानम् ।

– वसंत –

**इत्थं सदैव सकलीकरणंयथावत् ।**
**संभावयत्ययमशेषमलंघ्यशक्तिः ।।**
**भूतोरगादि विष किल्विष दुःखमुग्रं ।**
**निर्जित्य निश्चयसुखान्यनुभूयतेऽसौ ।।**

# ।। अथमहर्षिपर्युपासनम् ।।

इन्द्रवज्रा छंद

**ये ये ऽ नगाराऋषयो यतींद्रा मुनीश्वरा भव्यभवद्व्यतीताः ।**
**तेषां समेषां पदपंकजानि, संपूजयामो गुण शील सिद्धये ।।**

ओं ह्रीं सम्यग्दर्शन ज्ञान चारित्र पवित्रतरगात्रचतुरशीतिलक्ष गुण गणधर चरणाः ! अत्र आगच्छत आगच्छत संवौषट् ।ओं ह्रीं सम्यग्.... अत्र तिष्ठत-तिष्ठत ठः ठः ओं ह्रीं सम्यग्.... ! मम रत्नत्रयशुद्धिं कुरूत कुरूत । अत्र मम सन्निहिता भवत भवत वषट् ।

– अनुष्टप –

**सुगंधशीतलैः स्वच्छैः स्वादुभिर्विमलैर्जलैः ।**
**सार्धद्वीपद्वयातीत भवद् भव्य यतीन् यजे ।।**

ओं ह्रीं गणधरचरणेभ्यो जलं निर्वपामीति स्वाहा ।।१।।

**सारकर्पूरकाश्मीर – कलितैश्चंदनद्रवैः ।**
**सार्धद्वीपद्वयातीत – भवद्भव्ययतीन् यजे ।।**

ओं ह्रीं गणधरचरणेभ्यो चंदनं निर्वपामीति स्वाहा ।।२।।

**अक्षतैरक्षतैः सूक्ष्मैर्वलक्षैः ऋक्षसन्निभैः ।**
**सार्धद्वीपद्वयातीत भवद् भव्ययतीन् यजे ।।**
ओं ह्रीं गणधर चरणेभ्यो अक्षतान् निर्वपामीति स्वाहा ।।३।।
**पुष्पैप्रसर दामोदाहूत पुष्पंधयावृतैः ।**
**सार्ध द्वीप द्वयातीत भवदभव्य यतीन् यजे ।।**
ओं ह्रीं गणधर चरणेभ्यो पुष्पं निर्वपामीति स्वाहा ।।४।।
**हव्यैर्नव्यघृतापूप, पायसव्यंजनान्वितैः ।**
**सार्ध द्वीप द्वयातीत, भवद् भव्य यतीन् यजे ।।**
ओं ह्रीं गणधर चरणेभ्यो नैवेद्यं निर्वपामीति स्वाहा ।।५।।
**कर्पूरप्रभवैर्दीपैर्दीप्त्या दीपितदिङ्मुखैः ।**
**सार्धद्वीप द्वयातीत, भवद भव्य यतीन यजे ।।**
ओं ह्रीं गणधरचरणेभ्यो नैवेद्यं निर्वपामीति स्वाहा ।।६।।
**दशांग धूपसद् धूमैर्दशाशापूर्ण सौरभैः ।**
**सार्धद्वीपद्वयातीत भवद् भव्य यतीन् यजे ।**
ओं ह्रीं गणधरचरणेभ्यो धूपं निर्वपामीति स्वाहा ।।७।।
**चोचमोचाम्रजंबीर फलपूगादिसत्फलैः ।**
**सार्ध द्वीप द्वयातीत भवद् भव्य यतीन् यजे ।।**
ओं ह्रीं गणधरचरणेभ्यो फलं निर्वपामीति स्वाहा ।।८।।

– मालिनी –

**गुणमणिगणसिंधून – भव्यलोकैकबंधून् ।**
**प्रकटितजिनमार्ग ध्वस्तमिथ्यात्त्वमार्गान् ।।**
**परिचितनिजतत्त्वान् पालिताशेषसत्त्वान् ।**
**शमरसचित चंद्रानर्घ्ययामो मुनींद्रान् ।।**
ओं ह्रीं गणधरचरणेभ्यो अर्घ्यं निर्वपामीति स्वाहा ।।९।।
शान्तये शान्तिधारा । दिव्यः पुष्पांजलिः ।।

## अथ स्तुतिः

ये सर्वतीर्थप्रभवा गणेन्द्राः सप्तर्ध्दयो ज्ञानचतुष्टयाढयाः ।।
तेषां पदाब्जानि जगद्धितानां वचोमनोमूर्धसु धाययामः ।।१।।
तपोबलाक्षीणरसौषधर्ध्दीन्विज्ञानऋद्धीनपिविक्रियर्द्धीन् ।
सप्तर्द्धियुक्तानखिलानृषीन्द्रान स्मरामिवंदे प्रणमामिनित्यं ।।२।।
सर्वेषु तीर्थेषु तदंतरेषु सप्तर्षयो ये महिता बभूवुः ।
भवांबुधेः पारमिताः कृतार्था भवंतु नस्ते मुनयः प्रसन्नाः ।।३।।
ये केवलीन्द्राः श्रुतकेवलीन्द्राः ये शिक्षकास्तुर्यतृतीयबोधाः ।
सविक्रियाये वर वादिनश्च, सप्तर्षिसंज्ञानिह तान् प्रवंदे ।।४।।
प्रमत्तमुख्येषु पदेषु सार्धद्वीपद्वये ये युगपद् भवंति ।
उत्कर्षतस्तान्नवकोटीसंख्यान् वंदे त्रिसंख्यारहितान्मुनींद्रान् ।।५।।

## अथ स्वस्त्ययन विधानम्

श्रीपंचकल्याणमहार्हणार्हा वागात्मभाग्यातिशयैरूपेताः ।
तीर्थंकराः केवलिनश्चशेषाः स्वस्ति क्रियासुर्जगतेहिता नः ।।१।।
ये शुद्धमूलोत्तरसद्‌गुणानामाधार भावादनगारसंज्ञाः ।
निर्ग्रन्थवर्या निरवद्यचर्याः स्वस्ति क्रियासुर्जगतेहिता नः ।।२।।
ये चाणिमाद्यष्टसुविक्रियाढयास्तथाक्षयावासमहानसाश्च ।
राजर्षयस्तेसुरराजपूज्याः स्वस्ति क्रियासुर्जगतेहिता नः ।।३।।
ये कोष्ठबुद्धयादि चतुर्विधाद्धि- रवापुरामर्षमहौषधद्धिः ।
ब्रह्मर्षयो ब्रम्हाणि तत्परास्तेः स्वस्ति क्रियासुर्जगतेहिता नः ।।४।।
जलादिनानाविधचारणा ये ये चारणाग्न्यंबरचारणाश्च ।
देवर्षयस्ते नतदेववृन्दाः स्वस्ति क्रियासुर्जगतेहिता नः ।।५।।
सालोकलोकोज्वलनैकतानं प्राप्ताः परंज्योतिरनंतबोधम् ।
सर्वषिवंद्याः परमर्षयस्ते स्वस्ति क्रियासुर्जगतेहिता नः ।।६।।
श्रेणिद्वयारोहणसावधानाः कर्मोपशांतिक्षपण प्रवीणाः ।
ये ते समस्ता मुनयो महान्तः स्वस्ति क्रियासुर्जगतेहिता नः ।।७।।

समग्रमध्यक्षमिताश्चदेश–प्रत्यक्षमत्यक्षसुखानुरक्ता: ।
मुनीश्वरास्ते जगदेकमान्या: स्वस्ति क्रियासुर्जगतेहिता न: ।।८।।
उग्रं च दीप्तं च तपोभितप्तं महच्च घोरं च तरां चरन्त: ।
तपोधना निर्वृतिसाधनोक्ता: स्वस्ति क्रियासुर्जगतेहिता न: ।।९।।
मनोवच:काय बल प्रकृष्टा: स्पष्टीकृताष्टांगमहानिमित्ता: ।
क्षीरामृता स्त्राविमुखा मुनीन्द्रा: स्वस्ति क्रियासुर्जगतेहिता न: ।।१०।।
प्रत्येक बुद्ध प्रमखा मुनीन्द्रा: शेषाश्च ये ये विविधर्द्धि युक्ता: ।
सर्वेऽपि ते सर्वजनीनवृत्ता: स्वस्ति क्रियासुर्जगतेहिता न: ।।११।।

**– शार्दूल –**

**शापानुग्रह शक्तिताद्यतिशयैरूच्चावचैरंचिता: ।**
**ये सर्वे परमर्षयो भगवतां तेषां गुणस्तोत्रत: ।।**
**एतत्स्वस्त्ययनादपैति सकल: संक्लेशभाव: शुभ: ।**
**भाव: स्यात् सुकृतंच तच्छुमविधेरादाविदं श्रेयसे ।।१२।।**

इति स्वस्त्ययनं मन: प्रसादनविधानम्

# अथ यज्ञदीक्षाविधानम्

**इन्द्र प्रतिष्ठाविधि**

– अनुष्टुप –

**न्यसार्हद्द्रिष्टरे धृत्वानादिमंत्राभिमंत्रितम् ।**
**प्रसाधनं गुरोरग्रेयज्ञदीक्षामुपादधे ।।१।।**

ओं णमो अरिहंताणं । णमो सिद्धाणं । णमो आइरियाणं । णमो उवज्झायाणं । णमो लोण सव्व साहूणं ।

चत्तारि मंगलं – अरिहंत मंगलं । सिद्ध मंगलम् । साहू मंगलं । केवलि पण्णत्तो धम्मो मंगलम् ।

चत्तारि लोगुत्तमा – अरिहंत लोगुत्तमा । सिद्ध लोगुत्तमा । साहू लोगुत्तमा । केवलि पण्णत्तो धम्मो लोगुत्तमा ।

चत्तारि सरणं पव्वज्जामि – अरिहंत सरणं पव्वज्जामि सिद्ध सरणं पव्वज्जामि । साहू सरण पव्वज्जामि । केवलि पण्णत्तो धम्मो सरणं पव्वज्जामि ।

**ओं ह्रीं क्रों शांतिं कुरू कुरू स्वाहा ।** (अयमनादिसिद्ध मंत्रः)

(चंदन माला मुकुट आदि प्रसाधन वस्तुऐं एक पात्र में लेकर भगवान के सन्मुख रखना । पुनः उपरि आनादिसिद्धमंत्र बोलकर मंत्रित करके आगे के श्लोकों – मंत्रों के अनुसार उन – उन वस्तुओंको ग्रहण करना । या मंत्रित चंदन को उन २ वस्तुओं को लगाना)

– मालिनी –

**जिनमतमिव सूक्ष्मं यत्सुखस्पर्शदक्षं ।**
**क्षपितविविधबाधं साध्वलंकारमुख्यम ।।**
**शुचितरमपदोषं सद्गुण तद्दधेऽहं ।**
**परमजिनमखेऽस्मिन सांतरीयोत्तरीयम् ।।२।।**

**ओं ह्रीं श्वेतवर्णे सर्वोपद्रवहारिणी सर्वजनमनोरंजिनी परिधानोत्तरीये धारणीये हं हं झं झं वं वं सं सं तं तं पं पं परिधानोत्तरीयं धारयामि स्वाहा ।**

(वस्त्रोंको स्पर्श करना)

**पवित्रभूमिप्रभवैः पवित्रैः पवित्रमुद्रासहितं सुदृब्धम् ।**
**पवित्रताकृन्मम सव्यहस्ते त्वनामिकायां निदधे पवित्रम ।।३।।**

**ओं ह्रीं पवित्र मुद्रिकां धारयामि स्वाहा**

(दाहिने हाथ की अनामिका में पवित्र (अंगूठी) धारण करें ।)

**सुशीतलेनोक्तवदर्हदीशो यशोवदुच्चैर्विशदेन तस्य**
**तदंगवन्मंगलगंधभाजा समालभेऽगंमम चंदनेन**

श्री चंदनानुलेपनं (अपने शरीरपर गंध लगावें)

**चेतश्चमत्कारकरी जनानां गंधादिना या विदुषां विशेषात् ।**
**स्वर्भोगमालावहदिव्यशक्त्या मालां दधे मूर्ध्नि जिनार्चितां तां ।।५।।**

स्रग्धारणं (कंठ में माला धारण करें)

**दृग्बोधचारित्रगुणत्रयेण धृत्वा त्रिधौपासकभावसूत्रम् ।**

**द्रव्यं च सूत्रं त्रिगुणं समुक्ता–फलं तदारोपण मुद्वहामि ।।६।।**

ओं ह्रीं सम्यग्दर्शनज्ञान चारित्राय स्वाहा । (यज्ञोपवीत धारण करें)

**जिनेश्वराज्ञाभरवद्विशिष्टैर्धार्यं महाहार्यगुणौघरत्नं ।**

**मूर्ध्ना वहेयं मुकुटं महान्तं चंचत्प्रभामंडित कुंडलाभ्याम् ।।७।।**

ओं ह्रीं सम्यग्दर्शनाय स्वाहा (कुंडल और मुकुट धारण करें)

**आसन्नभव्ये जिनभक्ति मुख्या गुणा यथायोग्यमुपव्रजन्ति ।**

**तथैव यस्मिन् मणयोमहान्तः करे ममैतत्कटकं करोमि ।।८।।**

ओं ह्रीं सम्यग्ज्ञानाय स्वाहा । (कंकण प्रणयनं–कंकण धारण करें)

**उन्मुद्रिताशेषविनेयपद्मश्रीकेवलार्कोदयपूर्वशैलम् ।**

**यष्टुं जिनं जीवदयासमुद्रं मुद्रांदधे चारूमनामिकायाम् ।।९।।**

ओं ह्रीं सम्यक् चारित्राय स्वाहा । (मुद्रिका धारण करना)

**दृग्बोधदेशव्रतरूपरत्नत्रय भवेन्मे कलितोपवासम् (कलितैक भक्तं)।**

**आकर्मिकाब्रह्मनिवृत्तियुक्तं स्याद् यज्ञदीक्षाविधिना विशिष्टम् ।।१०।।**

(अर्हद्देवयज्ञदीक्षांगीकार :- विधानपर्यंत उपवास या एकभुक्ति आदि शक्तितः तथा ब्रह्मचर्य ग्रहण करके पूजन हेतु दीक्षा स्वीकार करें ।

**– वसंत –**

**रत्नत्रयांगमुपवीतमुरस्यथांगं ।**

**देशव्रतस्य वसु कंकणमत्र हस्ते ।।**

**ब्रह्मव्रतांगमधुना स्वकटौच मौजीं ।**

**धृत्वारभे जिनमखं मखदीक्षितोऽहम् ।।११।।**

दीक्षा चिह्नोद्वहनम् (कमर में कंदोरा और दाहिने हाथ में सूत अर्थात कलावे का कंकण बांधना तथा स्त्रियोंके बायें हाथ में बांधना ।)

**ओं वज्राधिपतये आं हां अः ऐं ह्रौं ह्रः श्रूं ह्रूं क्षः इंद्राय संवौषट् ।**

(इस मंत्र को २१ बार मनमें बोलते हुए 'मै इंद्र हूं' ऐसी भावना करना । अथवा विधानाचार्य इस मंत्र से २१ बार पूजक के मस्तकपर पुष्प क्षेपण

कर 'इंद्र' का न्यास करें ।)

(इति यज्ञदीक्षाविधानम्) ।

## अथ भूमिशोधनम्

(स्रग्धरा)

घंटाटंकारवीणाक्कणितमुरजधां-धां-क्रियाकाहलाच्छें-
च्छेंकारोदारभेरीपट हथल - धलंकारसंभूतघोषे ।
आक्रम्याशेषकाष्ठातटमथ झटिति प्रोच्चटत्युद्भटेऽभ्रम ।
शिष्टाभीष्टार्हदिष्टिप्रमुख इह लतांतांजलिं प्रोत्क्षिपामः ।।१।।

**ओं ह्रीं श्रीं क्षीं भूः स्वाहा ।**

(वाद्यघोषपूर्वक पुष्पांजलिं क्षिपेत्)

ओं समस्ताभ्युदयसुखसंघातलंघनजंघालसमुल्लासनानंतसुख नवासनिः श्रेयसनिवासनिसर्गमार्गप्रवचनप्रकाशस्य सहजात्मगुण समाजोपघात प्रसिद्धानादि संबंध घातिनिचयनिर्मूलक त्रिकाल गोचरानंतपर्यायांणां चराचर द्रव्य विषय केवल ज्ञानार्क किरण परिपूरितसकल लोकपरमात्मपद तिष्ठाधिष्ठित भागवदर्हद् भट्टारकस्य नागयक्षामर द्वात्रिंशन्मिथुनकरवालित चतुः षष्टिचामराद्यष्टमहाप्रातिहार्य विशिष्टस्य । विनीलकुंतल कुलिशदशन प्रवालाधरपल्लवोपमानकरचरण समुल्लसितस्य । श्रीश्रुतदेवी सर्वाह्नासनत्कुमारयक्ष प्रतिमोपलक्षित पीठोपकंठस्य। प्रत्येकाष्टशत भृंगारादिमंगल द्रव्याष्टगर्भगर्भावास मध्यममध्यासीनस्य । प्रेक्ष्यमाणवदा भाष्यमाणवदा लक्ष्य माणमणिमय प्रतिबिंबकदंबस्य निवासी भूतजतात्म भूतयसमाराधनीय भावमापनिपद्यमानस्य तमः समूल समुत्पाटन पटुतरावलेपलिप्सागत गभस्तिमालिमंडलायमान हट द्धाट कीयतटपेटकोपघटित चित्तचमत्कार स्य चकचकायमान नानविधोपकरणनिचितनीलतलनिर्जित ज्योतिर्गणांकित गगणांगणानाम् समुत्तुंग सुवर्णभित्तिभागावलंब मानमणिमाला भूषितमेरूगिरी पार्श्वशोभातिशयस्य । विचित्र निर्मापणवदनाभिषेक नर्तनसंगीतावलोकनादिमंडपाभिमंडित चैत्य महीमहितस्य । कुंजरातिकुंजरा दिदशविध ध्वजराजिताद्वितीय शालांतर ध्वज धरावराजितस्य । चतुर्दिगशोक

सप्तच्छद चंपकाम्र चतुर्वनांचिततृतीयबहि: शालांतर ध्वज धरावराजितस्य । चतुर्दिग गताशोक सप्तच्छदचंपकाम्र चतुर्वनांचिततृतीय बहि: शालांतर वनावनीविनूतस्य । चतुर्वीथीपर्यंतगतमहामानस्तंभाहित प्रतितीर्थजिनमानस्तंभस्य। साक्षादकृत्रिमचैत्यालयलक्ष्मीमात्मसात् कुर्वतश्चैत्यालयस्य विस्तार विशेष शालितयातदीयांगणोपमाने पुष्पांजलि:।

ओं ह्रीं परमब्रह्मणे नमो नम: । स्वस्ति स्वस्ति, जीव जीव, नंद नंद, वर्धस्व वर्धस्व, विजयस्व विजयस्व, अनुशाधि अनुशाधि पुनीही पुनीही पुण्याहं पुण्याहं मांगल्य मांगल्यं । पुष्पाञ्जलिं । सोदकानि पुष्पाणि क्षिपामि स्वाहा ।

**क्षेत्रं मखेऽस्मिन् परिपालयंतं विघ्नानशेषानपसारयन्तम् ।**
**वैश्वानराशापरिकल्पितेन श्री क्षेत्रपालं वलिना धिनोमि ।।२।।**

ओं ह्रीं क्षेत्रपालदेव ! अत्र आगच्छ २ संवौषट् स्वाहा इत्यादि ।

इति क्षेत्रपालार्चनं । आग्नेय दिशा में क्षेत्रपाल को अर्घ चढाना ।

**सर्वेषु वास्तुषु सदा निवसन्तमेनं ।**
**श्री वास्तुदेव मखिलस्य कृतोपकारं ।।**
**प्रागेव वास्तुमिह कल्पितयज्ञभाग –**
**स्यैशानकोणदिशि पूजनया धिनोमि ।।३।।**

ओं ह्रीं वास्तुदेवाय इदं अर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं दीपं चरू फलं बलिं स्वस्तिकं यज्ञभागंच यजामहे प्रतिगृह्यतां २ ।

(ईशान दिशा में अर्घ चढावे)

**विहारकाले जगदीश्वराणामवाप्त सेवार्थकृतापदानं ।**
**हुत्वार्चितो वायुकुमारदेव ! त्वं वायुना शोधय याग भूमिम् ।।४।।**

ओं ह्रीं वायुकुमाराय सर्वविघ्नविनाशनाय इदं अर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरू दीपं धूपं फलं स्वस्तिकं यज्ञ भागंच यजामहे प्रतिगृह्यतां –२ । महीं पूतां कुरू कुरू हुं फट् स्वाहा । षड्दर्भपूलेन भूमिं संमार्जयेत् ।

**विहारकाले जगदीश्वराणामवाप्त सेवार्थकृतापदानं ।**
**हुत्वार्चितो मेघकुमारदेव ! त्वं वायुना शोधय याग भूमिम् ।।५।।**

ओं ह्रीं मेघकुमाराय सर्वविघ्नविनाशनाय इदं अर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरूं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञ भागंच यजामहे प्रतिगृह्यतां २। धरां प्रक्षालय प्रक्षालय अं हं सं वं झं ठं यक्ष फट् स्वाहा । षड् दर्भपूलोपात्तजलेन भूमिं सिंचेत ।

**गर्भान्वयादौ महितद्विजेन्द्रैर्निर्वाणपूजासु कृतापदानं ।**

**हुत्वार्चितो वह्निकुमारदेव ! त्वं ज्वालयाशोधय यागभूमिम् ।।६।।**

ओं ह्रीं अग्निकुमाराय इदं अर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरूं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञ भागंच यजामहे प्रतिगृह्यतां २ । भूमिं ज्वालय ज्वालय अं हं सं वं झं ठं यक्ष फट् स्वाहा । ज्वलद्दर्भपूलानलेन भूमिं ज्वालयेत् । . (दर्भपूला में कपूर रखकर जलावें)

**प्राचीमैशानीं चांतरा वातकुमारादि स्थापनं ।**

(पूर्व दिशा और ईशान दिशा के अंतराल में वायुकुमारादि की स्थापना करें ।)

**तुष्टा अमी षष्टिसहस्त्रनागा, भवन्त्ववार्या युवि कामचाराः**

**यज्ञावनीशानदिशाप्रदत्त – सुधोपमानांजलिपूर्णवार्भिः ।।७।।**

ओं ह्रीं क्रों षष्टिसहस्रसंखेभ्यो नागेभ्यः स्वाहा । इदं अर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरूँ दीपं धूपं फलं बलिं स्वस्तिकं यज्ञ भागंच यजामहे प्रतिगृह्यतां २ । नागतर्पणार्यमैशान्यां दिशि जलांजलिंक्षिपेत् ।

(नागों के संतर्पण हेतु ईशान दिशा में जलांजलि देवें ।) इति भूमिशोधनम्

## अथ पुण्याहवाचना

गद्य – श्रीमदर्हत्परमेश्वरोपदिष्टशिष्टेष्टदयामूलधर्मप्रभावकयष्ट्र्याजक प्रभृति भव्य जनानां सद्धर्मश्रीबला युरारोग्यैश्वर्याभिवृद्धिरस्तु । अथ दयार्द्रवृत्तित्वलक्षण न्यायनिष्ठ श्रुतिस्मृतिपुरावृत्तमंत्रक्रियादेवतालिंग कामान्नविषय दशशुद्धिप्रतिष्ठाधिष्ठिते, श्रीमज्जिनशासने भगवतो महति महाविर वर्धमानतीर्थकरस्य धर्मतीर्थे, तत्साक्षात्समाराधक सकलगुणगरिमगौतममहर्षि चंदनार्यिका श्रेणिकमहामंडलेश्वर चेलिनीप्रभृतिऋष्यार्यिका श्रावक श्राविका भेदचतुर्विधसंघपरंपरातिश्लाघनीय गुणसंघ श्रीमूलसंघे, भूर्भवः स्वर्भेदात् त्रैविध्यमात्मसात् कुर्वाणस्य लोकस्य

मध्यमध्यासीने मध्यमलोके, तन्मध्यवर्तिनो लक्षयोजनोदयस्य सुदर्शनमेरोर्दक्षिणभागे, षड्विंशपंचशतयोजनैकोन विंशतिषड्भागविस्तारानादि सिद्ध भरतव्यपदेश भरतक्षेत्रे विजयार्धगंगा सिन्धु प्रवृत्तिविहितषट् खंडमंडिते त्रिषष्टि शलाका पुरूषप्रभृत्यार्यजनसमुत्पत्तिपवित्रितार्यखंडे, तत्रावस्थितायोध्यां दक्षिणेन स्थिते पशु धान्यहिरण्यकुप्यादिसमृद्धिवर्णनीयवर्णाश्रमाकीर्ण कर्णाटक देशे, धार्मिक समाजसततविधीयमानविविध पुण्योत्सव निकराकरेऽस्मिन्नगरे क्षीरद्रुमादिभि: समुचितोत्सेधव्यासायामविनिर्मितविविध धालंकारमंडित यज्ञमंडपे, अनाद्यनन्त कालसंतानमध्य पतितासंख्यातोत्सर्पिण्यवसर्पिणीसमनंतरोपनतदशकोटाकोटी सागरो पमप्रमितहुंडावसर्पिणीकाले प्रवर्तमाने तत्र सविंशतिशतायु:सप्त हस्तोत्सेधरूक्ष वर्णशरीर प्रजाप्रभृतिवर्तनालक्षणैकविंशतिसहस्त्रवर्ष प्रमितिदु:षमनाम्नि पंचमे कलियुगे प्रवर्तमाने, तत्र शालिवाहनशक काले.... वर्षसंमिते सति प्रवर्तमान.... नाम संवत्सरे.....अयने ऋतौ.... मासे....पक्षे... तिथौ....वार युक्तायां तिथिवार नक्षत्र योगकरणाख्यपंचांगतिथिसंशुद्धि निर्दोषायत्तलग्नशुद्धिवि लग्नहोराद्रेषकानन वांशद्वादशांशाभिधानषड्वर्गशुद्धिविविधभेद प्रभेद गोचरशुद्धिरूदर्क फलावगमनिमित्त शुद्धिरित्येवंविधपंचशुद्धि-समन्वित-प्रशस्त मुहूर्तयुक्तायां, वीतयोषाभूषादि संगत्वाद्वीतरागत्वं,निरस्तनिस्त्रिंशत्वादपास्तद्वेषत्वं,तदुभयनिमित्तनिश्चल ध्यानैकतान त्वं, तत्कारणकर्मक्षयसर्वज्ञत्वादि गुणान् साक्षात्कथयंत्या इव भगवज्जिनार्चाया: जिनप्रतिमाया:सन्निधौ सकलसमयसमाराध्य निरवद्यविद्यारूपवाग्देवतासन्निधौ, चतुरजनचेतश्चमत्कारिचतुरनुयोगाधीतिबोधाचरण प्रचारणपरायणाचार्यवर्यस्य सन्निधौ, निरस्तविषयाभिलाषनिरारंभनि:परिग्रहनितांतज्ञान ध्याननिरतमुमुक्षुवर्गसन्निधौ, निरवद्यस्याद्वादविद्याविदग्धपदवाक्य प्रमाणज्ञ विद्वज्जनसन्निधौ, न्याय विहित प्रजापालनमतिपालनकुलपालनात्मपालननीतिर्पालनसमंजसत्व लक्षणक्षात्र धर्मराजद्राजादिसन्निधौ, आर्यषट्कर्मगर्भान्वयादि कर्मकर्मठ धर्म क्रिया कुतूहलत्रैवर्णिकसमाजसन्निधौ,न्यायार्जितरक्षितवद्धितार्थं पात्रविनियोगेन सकलं कुर्वन्त: सर्वहितदयामूलमर्हच्छासनं महामहादिभि: प्रभाव यतो धार्मिकस्य सन्निधौ, तेन विधाप्यमानजिनयज्ञमहोत्सवे, स्नानानुस्नान लेपभूषण वसनास्य शरीरोपस्कार

शुद्धिपंचकं शोषणदहन भस्मी करणामृतप्लावननिजात्मध्यानाह्वयात्मशुद्धिपंचकंच प्राप्ता एये वयं पंचोपचारादिक्रिया शुद्धिसहितं, औत्सर्गिक विशेष विषयाशेषमंत्र शुद्धिसहितं,केवलि दशपूर्व धरैकादशांगधर प्रथमांग धरसूत्रकारभाष्यकार प्रभृत्याचार्य परंपरायाताजनसंहिताशास्त्र तदुपदेश तत्कर्मप्रयोगानुक्रमायातेन विधिना विधीयमान प्रतिष्ठाकर्मणि सकलाभ्युदयनिः श्रेयससिद्धयर्थं, शुद्धयर्थं, शान्त्यर्थं, शान्ति होमविधिं विधास्यामः तत्कर्मणः पुण्याहार्थं ऋद्धयर्थंस्वस्त्यर्थं पुण्याहवाचनां कर्तुमुत्सहामहे। इति संकल्प्य तदङ्गत्वेन कर्मणः पुण्याहवाचनां कुर्यात ।।

**तत्रैव प्रयोगः**

एक पाटे या चौकीपर एक सेर श्वेत चावल फैलाकर स्वस्तिक बनावें । उस पर 'ह्रीं' बीजाक्षर लिखें । उसके ऊपर तीर्थ जल से भरे कलश को स्थापित करें। इसको गंध अक्षतसे चर्चित कर पत्ते लगाकर पुष्प रखें और श्वेत सूत्र से वेष्टित कर दर्पण लगावें, नवरत्न डालें । इसमें मंत्रित जल भरें । पुनः इस कलश को हाथ में लेकर आगे के पुण्याहं मंत्रों का उच्चारण करते हुए सर्वत्र जल छिडकें।

**गद्य** – शालीनां प्रस्थं प्रस्तीर्य तत्र ह्रींकारं वेष्टित स्वस्तिक यंत्रं समालिख्य, तदुपरि तीर्थजलपरिपूरितगंधाक्षतपुष्पाद्यर्चितपल्लव दर्पण शोभित दर्भ पल्लवांचिततंडुलपरिपूरितपात्र पिहित पंचरत्न सुवर्ण गर्भितसच्छवेतसूत्रावृत चंदनपंकमग्नशाल्यक्षतोपलक्षित – कंठ लग्न नव वस्त्र पुष्पदाम शोभित शुभ लक्षण लक्षित सनालकलशं संस्थाप्य तत्कलशजलं यष्ट्र प्रभृतिसर्वजनेषु सर्वशान्ति मंत्र मुच्चारयन् सिंचेत् ।

ओं ह्रीं स्वस्तये कलशस्थापनं करोमि स्वाहा ।

ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमते समस्त गंगासिन्ध्वादितीर्थ नदीजलं भवतु स्वाहा ।

**अभ्यर्च्य कलशं तोयप्रवाहै श्चंदनैरहं ।**
**अक्षतैः कुसुमैरन्नैर्दीप धूप फलैरपि ।।**

ओं ह्रीं नेत्राय संवौष्ट् कलशार्चनं करोमि स्वाहा ।

## पुण्याहवाचन

ओं पुण्याहं -पुण्याहं प्रीयन्तां प्रीयन्तां भगवन्तोऽर्हन्त: सर्वज्ञा: सर्वदर्शिन: त्रिलोकनाथा: त्रिलोकप्रद्योतनकरा: वृषभाऽजितसंभवाभिनंदन-सुमति पद्मप्रभ-सुपार्श्व-चन्द्रप्रभ-पुष्पदंत-शीतल-श्रेयो वासुपूज्य-विमल अनंत-धर्म-शांति-कुंथु-अर-मल्लि-मुनिसुव्रत-नमि-नेमि-पार्श्व-श्रीवर्धमाना: शांता: शांतिकरा: सकलकर्मरिपुविजयकांतारदुर्गविषमेषु रक्षंतु नो जिनेन्द्रा: सर्वविदश्च । श्री न्ही धृति कीर्ति कान्ति बुद्धि लक्ष्मी मेधाविन्य: सेवा कृषि वाणिज्य वाद्यलेख्यमंत्रसाधन चूर्णि प्रयोगस्थानगमन सिद्धिसाधनाया प्रतिहत शक्तयो भवन्तु नो विद्यादेवता: ।। नित्यमर्हत्सिद्धा चार्योपाध्यायसर्वसाधवश्च भगवंतो न: प्रीयन्तां प्रीयन्तां ।। आदित्य सोमांगारबुधबृहस्पतिशुक्रशनैश्चर राहु केतु ग्रहाश्च न: प्रीयन्तां प्रीयन्तां ।। तिथिकरण मुहूर्त लग्नदेवता: इह चान्यग्राम नगरादिषु अपि वास्तु देवता इच ता: सर्वा गुरूभक्ता अक्षीणकोष कोष्ठागारा भवेयुर्दान तपोवीर्यं नित्यमेवास्तु न: प्रीयन्तां प्रीयन्तां ।। मातृ पितृ भ्रातृसुतसुह्रतस्वजनसंबंधिबंधु वर्गसहितानां धनधान्यैश्वर्यद्युति बल यशोवृद्धिरस्तु । प्रमोदोऽस्तु । शांतिर्भवतु । पुष्टिर्भवतु । सिद्धि र्भवतु । काममांगल्योत्सवा:सन्तु । शाम्यन्तु घोराणि । शाम्यन्तु पापानि । पुण्यं वर्धताम्। धर्मो वर्धताम् श्यायुषी वर्धेताम् । कुलं गोत्रं चाभिवर्द्धताम् । स्वस्ति भद्रं चास्तु न:। हतास्ते परिपंथिन: । शत्रव: शमं यान्तु । निष्प्रतिघमस्तु । शिवमतुलमस्तु । सिद्धा: सिद्धिं प्रयच्छन्तु न: स्वाहा ।

ओं कर्मण: पुण्याहं भवन्तो ब्रुवन्तु इति प्रार्थयेत् (ऐसा विद्वान बोले) प्रार्थितविप्रा: पुण्याहं कर्मणोऽस्तु इति ब्रूयु: ।। अनेन प्रकारेण । ॐ कर्मणे स्वस्ति भवन्तो ब्रुवन्तु स्वस्ति कर्मणेऽस्तु च । कर्मऋद्धिं भवन्तो ब्रुवन्तु कर्मऋद्धिरस्तु। (एतद् वाक्य त्रयोच्चारणान्ते त्रिवार पात्रांतर पातित पूर्णकलश जलेन सभां शान्तिमन्त्रेण सिंचेत् ।।)

## अथ शांतिमंत्र:

(पुन: इस शांतिमंत्र को बोलते हुए सभी पर जल सिंचन करें ।)

अथ निरतिशयनिजमहिमभरसमसमानात्मीयचरण परिचरणचतुर चतुर्णि

कायामरनिकुरूंबशुंभत्कोटीरकोटीतटघटित स्फुटतरप्रभाभासुरानेकनूत्न - रत्ननिकराकर दिवाकर शताधिकातिगंभीरविपुलप्रभामंडल क्षीरोददिंडीरपिंडाय मानचतु:षष्टि चामरप्रभृतिपरिलक्ष्यमाणाप्रतिपक्ष बहिरंगमहालक्ष्मीवान् । अशेषदोषावरणविगमसम नंतरसमुद्भूतसकल लोकालोक-निरंतर परिपूर्णसर्वद्रव्यपर्यायविषयक्रमकरण व्यवधाना तिवर्तिकेवलाख्यपरंज्योति: स्वरूपांतरंगिकाक्षयमहालक्ष्मीवान् । अभ्यर्हिताखिलाभ्युदयानि: श्रेयससंपादक: स्याद्वादन्यायनायक: परमाप्तो भगवानर्हद्भट्टारक: । मातृपितृभ्रातृसुहृत स्वजनसंबंधिबंधुवर्गसहितयजमानस्य सकल कल्याणं करोतु। शांतिं कान्तिमाविष्करोतु प्रादुष्करोतु।। सौभाग्यमारोग्यमात -नोतु संतनोतु ।। संपदमापदं संपादयतु संविदारयतु ।। अयशोयशो निष्कासयतु विकाशयतु ।। एनो मतिमवसादयतु प्रसादयतु ।। सुखमसुखं तनोतु धुनोतु ।। अनभिमत मभिमतं वारयतु पूरयतु ।। श्रियमायु: श्लाघयतु द्राघयतु ।। पुण्यं पापं व्याजृंभयतु स्तंभयतु ।। कुपथं सुपथं व्यावर्तयतु प्रवर्तयतु ।। सत्कर्मासत्कर्म बोधयतु रोधयतु ।। अनेकान्तमेकान्तं निध्यापयतु विद्यापयतु ।। विद्यामविद्यामुन्मीलयतु समुन्मूलयतु ।। सच्छास्त्र मसच्छास्त्रं पोषयतु शोषयतु।। श्रेय: प्रत्यवायं पुष्णातु मुष्णातु ।। क्षामं क्षेमं क्रशयतु भृशयतु ।। शौचमाचारं प्रथयतु द्रढयतु ।। कुमतिं सुमतिं अनिशं मर्दयतु वर्ध्दयतु ।। सकलाभ्युदयनि:श्रेयससिद्धिं करोतु वृद्धिं करोतु ।। झ्वीं क्ष्वीं हं स: स्वाहा ।।

('शांति होम' यह प्रतिष्ठा में कार्यसिद्धि के लिए, सर्व अभ्युदय और नि:श्रेयस की सिद्धि के लिए, शुद्धि के लिए, शांति के लिये आदि हेतु से किया जाता है । उसमें पहले संकल्प किया जाता है । अनंतर पुण्याहवाचन विधि की जाती है ।)

## आशीर्वाद

कल्याणमस्तु कमलाभिमुखी सदाऽस्तु दीर्घायुरस्तु कुलगोत्रधनं सदाऽस्तु आरोग्यमस्त्वभिमतार्थफलाप्तिरस्तु । भद्रं सदास्तु जिनपुंगवभक्तिरस्तु ।

(यजमान के मस्तक पर पुष्प क्षेपण करें ।)

## अथ दर्भस्थापणं

**ब्रह्मप्रदेशे निदधामि पूर्वं, पूर्वादिकाष्ठासु पुनः क्रमेण ।**
**दर्भं जगद्गर्भजिनेन्द्र यज्ञे, विघ्नौघविध्वंसकृते समंत्रम् ।।१।।**

प्रकृतक्रमविध्यवधानाय पुष्पांजलिः ।।

**ओं परमब्रह्मभूयाप्त परमाप्तजिनक्रतौ ।**
**ब्रह्मस्थाने स्थितं कुर्वे, दर्भं विघ्नोपशांतये ।।२।।**

ओं दर्पमथनाय नमः स्वाहा । ब्रह्मदर्भः ।। (पांच दर्भ के तिनके रखें)

**ओं सर्वज्ञस्य यज्ञेशो, यज्ञेऽस्मिन् निदधे कुशम् ।**
**शतयज्ञहरिद्भागे, यज्ञविघ्नविदारणम् ।।३।।**

ओं ह्रीं अनंतज्ञानाय अनंतदर्शनाय अनंतसुखाय अनंतवीर्याय पूर्वदिग्मुखे दर्भमवस्थापयामि स्वाहा । इंद्रदर्भः (१२ दर्भ के तिनके रखें)

**ओं विश्वदोषसंप्लुष्टा–द्यागे वैश्वानरात्मनः ।**
**वैश्वानरहरिद्भागे, कुशखंड निवेशयेत् ।।४।।**

ओं ह्रीं ब्रह्मणे स्वाहा । प्रजापतये स्वाहा । जिनाय स्वाहा । जिनोत्तमाय स्वाहा । धवाय स्वाहा । धवोत्तमाय स्वाहा । शुचिष्ठाशुचिष्ठेषु कोणाकोणेषु आग्नेयां दिशि दर्भमवस्थापयामि स्वाहा । अग्निदर्भः (अग्नि को ३/३ का दर्भ)

**ओं वैवस्वतमहामूर्ते – र्विवस्वत् कोटिदीधितेः ।**
**यागे वैचस्वताशायां दर्भखंडं निदध्महे ।।५।।**

ओं ह्रीं अनन्त वीर्याय जितेन्द्रियाय दक्षिणस्यां दिशि दर्भमवस्थापयामि स्वाहा । यमदर्भः (चार दर्भ के तिनके रखें ।)

**ओं क्षमामय क्षमामूर्ते ! पुण्यराशेर्महामहे ।**
**पुण्ये पुण्यजनाशायां दर्भन्यासं वितन्महे ।।६।।**

ओं ह्रीं परमब्रह्मणे नैऋत्यादिशि दर्भमवस्थापयामि स्वाहा । (६ दर्भ के तिनके)

**ओं विघ्नशान्तये शान्तेरपांमूर्तिमतः क्रमौ ।**
**अपां पत्युस्तनोम्याशां पवित्रेण पवित्रिताम् ।।७।।**

ओं परममङ्गलाय परमपवित्रिताय परमनिर्वाणकारणाय अपरस्यां दिशि दर्भमवस्थापयामि स्वाहा । वरूणदर्भः । (७ दर्भ के तिनके रखें ।)

**ओं निःसंगस्वरूपस्य, यागेऽस्मिन्मारूमात्मनः ।**
**मारूतस्य ककुब्भागे कुशमास्थापयामहे ।।८।।**

ओं ह्रीं पंचमहाकल्याण संपूर्णाय वायव्यांदशि दर्भमवस्थापयामि स्वाहा । वायुदर्भः । (३ दर्भ के तिनके रखें ।)

**ओं सर्वसौम्यरूपस्य सोममूर्तेर्महामखे ।**
**सौममौलिसुहृत्काष्ठां कुशोऽयमधितिष्ठतु ।।९।।**

ओं ह्रीं त्रैलोक्यनाथाय त्रिलोकमहिताय शुचिरत्नत्रयदेशकाय उत्तरस्यां दिशि दर्भमवस्थापयामि स्वाहा । यक्षदर्भः । (९ दर्भ के तिनके रखें।)

**ओं निर्लेपस्य जिनेंद्रस्य, व्योममूर्तेर्महाध्वरे ।**
**व्योमकेशस्य दिग्भागं, कुर्म हे दर्भगर्भितम् ।।१०।।**

ओं ह्रीं नवकेवललब्धिसमन्विताय देवाधिदेवाय ऐशान्यां दिशि दर्भमवस्थापयामि स्वाहा ईशानदर्भः । (१० दर्भ के तिनके रखें ।)

**पूर्वैशानस्य दिग्भागे शान्त्यर्थं जगतामिह ।**
**पातालवासिनो यक्षाक्षिपामि भुजगेशिनाम् ।।११।।**

ओं ह्रीं फणालंकृतमूर्तये धरणेंद्राय कूर्मवाहनसमन्विताय अधरस्यांदिशि दर्भमवस्थापयामि स्वाहा । ईशानेन्द्रमध्ये धरणेंद्रदर्भः । (८ दर्भ के तिनके रखें ।)

**सुधाकर निवेशाय ऊर्ध्वभागनिवासिने ।**
**अर्हच्चरणसेवाय रोहिणी जीवितेशिने ।।१२।।**

ओं ह्रीं क्रों हरिणलांघनसमन्विताय सोमाय ऊर्ध्वायां दिशि दर्भमवस्थापयामि स्वाहा (१६ तिनके का दर्भ रखें) इति दर्भस्थापनं ।

**वार्दर्भगंधैः सुमनोऽक्षतौघैः धूपप्रदीपैरमृतोपमान्नैः ।**
**क्रमान्महामो महितां महद्भिर्महीं महादेवमहामहस्य ।।११।।**

ओं नीरजसे नमः । शीलगंधाय नमः । (क्रमसे जल, गंध स्वाहा ।)

अक्षताय नमः अक्षतान् । विमलाय नमः - पुष्पं । परमसिद्धाय नमः । चरूं । ज्ञानोद्योतनाय नमः दीपं । श्रुतधूपाय नमः धूपं । अभीष्टफलदाय नमः फलं । भूमिदेवतायै नमः अर्घ्यं ।

## * अथ मंडप प्रतिष्ठाविधानम् *

ओं मणिमयमहास्तंभसंभृतसप्तादि द्वात्रिंशदंतकरान्यतमायामसमुत्तुंग समचतुरस्त्रचतुर्द्वारोत्तंभितघंटादर्पणाघलंकृतकपिलाविशुद्धगोभयपयोद्रुम कषाय संमार्जनमहितमहीतलविहितविचित्ररंगावलिविराजितं। समसमुत्पन्नसुरचापशत शंकावह-विचित्रवितानसंपादितचित्तचमत्कारंसौरभासक्त मधुकरमालाकरंबित कमनीयकुसुममालाकलापनिरंतरितांतरालम् । दश विधानेक ध्वंजदंड कोटि विघट्यमानघनाघनगलन्मुक्तासारसंकाशमुक्ताफललंबूषतारकादिभूषणाविभूषितम्। विविधाकारकल्पिताल्पकेतनमालालंब मानधवलकलशाष्टकदर्भ मालावरण विभ्राजितम् धूपघटपटलनिर्यद्‌धूम लेखासौरभप्रसरसुरभीकृतसकल दिङ्मुखम्। दर्शनविशुद्धयादिषोडश भावनीयभव बीजयवसिद्धार्थादिद्रव्यबीजकृत पुंजनिकरूंबरंजितम् । मणि कनकचंदनमलयानेकयज्ञांग भाजनभाव द्रव्यरत्नफल पल्लव दूर्वादि पूजापरिकरपरिपूर्णम् । घोषविशुद्ध प्रवचनपाठस्तवनाशीर्वादवाद्यप्रमुख निनादमुखरितदिगंतरविविधविनेयजनपरिपूरितम् । जन्माभिषवन्समय पांडुकशिला तटघटितमहामंडपलक्ष्मीमात्मशोभातिशय भव्यजन संकल्पाभ्या सादात्मसात्कुर्वाणम्। निर्वाण कारण दयायागसाधन तयामहनीयमखिल मंगल मंडित महामंडप मिमं बहुमानयामहे।

(मंडपांतः समंताद् भूषणादिवस्तुषु च पृथक् कुंकुमाक्त पुष्पाक्षतं क्षिपेत् ।।)

**यत्पंचवर्णाक्तपवित्रसूत्रं । सूत्रोक्ततत्त्वाभमनेकमेकम् ।**
**तेन त्रिवारं परिवेष्टयामः शिष्टेष्टयागत्रयमंडपेन्द्रं ।।**

(मंडपमिमंबहिः पंचवर्णसूत्रेण त्रीन्वारान्वेष्टयेत्)

**श्रीमंडपाभं मिलितत्रिलोकी श्रीमंडितंपंडितपुंडरीकम् ।**
**श्रीमंडपं खंडितपापतापं तमेनमर्घ्येण च मंडयामः ।।**

ओं ह्रीं मंडपार्चनं करोमि स्वाहा ।

स्तोत्र, आशीर्वाद, मंगलपाठ आदि बोलते हुए, बाजों की ध्वनिपूर्वक पंचवर्णसूत्र (कलावा / मोळी) वेदि, मंडप को लपेटे ।

## * अथ कुमुदादि द्वारपालानुकूलनम् *

**रक्षार्थमस्यपूर्वादि – द्वारदक्षिणभागकं ।**
**कुमुदं चांजनं यक्षे वामनं पुष्पदंतकम् ।।१।।**

तोरणोपांतापसव्यदेशेषु कुंकुमाक्तपुष्पाक्षतं क्षिपेत् ।

**– स्रग्धरा –**

**कुंभुं शुंभंतमुच्चै, धंवलितममितः, सर्वसस्यांकुराढयैः ।**
**पंचास्यैः स्वतिकस्थं, सततमभिमुखं, लीलया लोकयंतम् ।।**
**विभ्राणं हेमदंडं, मरकतखचितं, कांतियुक्तं कदल्याः ।**
**पूर्वद्वाराधिकारं, कुमुदमतिमुदं, कुर्महे पूजनेन ।।**

ओं ह्रीं कुमुदप्रतीहार! पूर्वद्वारे तिष्ठ तिष्ठ ठः ठः । (इत्यादि मंत्रोंसे पुष्पांजलि क्षेपण कर अर्घ्य समर्पित करें ।)

**कुंभुं शुंभंतमुच्चै, धंवलितममितः, सर्वसस्यांकुराढयैः ।**
**पंचास्यैः स्वतिकस्थं, सततमभिमुखं, लीलया लोकयंतम् ।।**
**विभ्राणं हेमदंडं, मरकतखचितं, कांतियुक्तं कदल्याः ।**
**कुर्वेऽपाग्द्वारपालं, बलिविहितमुदं, सांजनाभाजनत्वाम् ।।२।।**

ओं ह्रीं अंजनप्रतीहार! दक्षिण द्वारे तिष्ठ तिष्ठ ठः ठः । इत्यादि....इदं अर्घ्यं...

**कुंभुं शुंभंतमुच्चै, धंवलितममितः, सर्वसस्यांकुराढयैः ।**
**पंचास्यैः स्वतिकस्थं, सततमभिमुखं, लीलया लोकयंतम् ।।**
**विभ्राणं हेमदंडं, मरकतखचितं, कांतियुक्तं कदल्याः ।**
**प्रत्यग्द्वाराधिकारं, विधुधवलरूचं, वामनंमानयामि ।।३।।**

ओं ह्रीं वामनप्रतीहार! पश्चिमद्वारे तिष्ठ तिष्ठ ठः ठः । इदं अर्घ्यं ....

**कुंभुं शुंभंतमुच्चै, धंवलितममितः, सर्वसस्यांकुराढयैः ।**
**पंचास्यैः स्वतिकस्थं, सततमभिमुखं, लीलया लोकयंतम् ।।**
**विभ्राणं हेमदंडं, मरकतखचितं, कांतियुक्तं कदल्याः ।**

लब्धोदग्द्वारदक्षं, विधिविहितबलिं पुष्पदंतं तनोमि ।।५।।

ओं ह्रीं पुष्पदंतप्रतीहार । उत्तरद्वारे तिष्ठ तिष्ठ ठः ठः । इदं अर्घ्यं पाद्यं....

।। इति मंडप प्रतिष्ठा विधानम् ।।

# - पूजामुखविधि -

### ※ घटयात्राविधि ※

अभिषेक प्रारंभ करने के पहिले अभिषेक तथा पूजन के लिए जल आवश्यक है । इसलिए सौभाग्यवती स्त्रियाँ अथवा कन्याऐं बाजेके साथ अपने-अपने माथेपर नारियल ढके हुए कलश ले जावें और निम्नलिखित विधिपूर्वक जल लावें । नीचे के श्लोक प्रमाण जलाशय पर अर्घ चढावें और उत्सवपूर्वक जल को मंदिरजी में शद्धिपूर्वक लावें । वेदि प्रतिष्ठा या अन्य कलशारोहणादि विधियोंमें भी इसी तरह लावें ।

– शार्दूल –

**पद्मापादनतो महामृतभवानंदप्रदानान्नृणाम् ।**
**जैनामार्ग इवावभासिविमलो, योगीवशीतिभवन् ।।**
**जैनेन्द्र स्नपनोचितोदकतया क्षीरोदवत् तत्सताम् ।**
**प्रज्ये त्वां शुभशुद्धजीवननिधिं कासार संपूजये ।।१।।**

ओं ह्रीं पद्माकराय अर्घ्यं निर्मपामीति स्वाहा ।

**श्रीमुख्यदेवीः कुलशैलमूर्द्धं पद्मादि पद्माकरसद्मसक्ताः ।**
**पयः पटीराक्षत पुष्प हव्य प्रदीपधूपोद्धफलैः प्रयक्ष्ये ।।२।।**

ओं ह्रीं श्री प्रभृति देवीभ्यः इदं जलादि अर्घ्यं....

**गंगादिदेव्यरतिमंगलांगा गंगादि विख्यातनदीनिवासाः ।**
**पयः पटीराक्षत पुष्प हव्य प्रदीप धूपोद्धफलैः प्रयक्ष्ये ।।३।।**

ओं ह्रीं गंगादि देवीभ्यः इदं जलादि अर्घ्यं...

**सीतानदीविद्धमहाह्रदस्थान् ह्रदेश्वरान्नागकुमारदेवान् ।**
**पयः पटीराक्षतपुष्प हव्य प्रदीपधूपोद्धफलैः प्रयक्ष्ये ।।४।।**

ओं ह्रीं सीताविद्ध महाह्रद देवेभ्यः इदं जलादि अर्घ्यं

**सीतोत्तरामध्य महाह्रदस्थान् ह्रदेश्वरान्नागकुमारदेवान् ।**

**पयः पटीराक्षतपुष्प हव्य प्रदीपधूपोद्धफलैः प्रयक्ष्ये ।।५।।**

ओं ह्रीं सीतोदविद्ध महाह्रददेवेभ्य: इदं जलादि...

**क्षारोदकालोदकतीर्थवर्ति श्रीमाग धादीनमरानशेषान् ।**

**पयः पटीराक्षतपुष्प हव्य प्रदीपधूपोद्धफलैः प्रयक्ष्ये ।।६।।**

ओं ह्रीं लवणोदकालोदमागधादि तीर्थ देवेभ्य इदं जलादि...

**सीतातदन्त्यद्वयतीर्थवर्ति श्रीमागधादीनमरानशेषान् ।**

**पयः पटीराक्षतपुष्प हव्य प्रदीपधूपोद्धफलैः प्रयक्ष्ये ।।७।।**

ओं ह्रीं सीतासीतोद्यो: मागधादि तीर्थ देवेभ्य: इदं जलादि

**समुद्रनाथांल्लवणोदमुख्यसंख्या व्यतीतांबुधिभूति भोक्तृन्**

**पयः पटीराक्षतपुष्प हव्य प्रदीपधूपोद्धफलैः प्रयक्ष्ये ।।८।।**

ओं ह्रीं संख्यातीत समुद्रदेवेभ्यो अर्घ्यं

**लोकप्रसिद्धोत्तमतीर्थदेवान् नन्दीश्वरद्वीपसरः स्थितादीन् ।**

**पयः पटीराक्षतपुष्प हव्य प्रदीपधूपोद्धफलैः प्रयक्ष्ये ।।९।।**

ओं ह्रीं लोकाभिमत तीर्थदेवेभ्यो जलादि...

**गंगादयः श्रीप्रमुखाश्चदेव्यः श्रीमागधाधाश्च समुद्रनाथाः**

**ह्रदेशिनोऽन्येऽपि जलाशयेशास्ते सारयन्त्वस्य जिनोचितांभः ।।१०।।**

ऊपर का 'गंगादय...' आदि श्लोक मंत्र बोलकर जलाशय से जल निकालना चाहिए । कलशों को चंदन लगाकर नीचे लिखा मंत्र बोलकर कलशोंमें जल भरना चाहिए ।

ओं ह्रीं श्री ह्रीं धृति कीर्ति बुद्धि लक्ष्मी शान्ति पुष्टय: श्री दिककुमार्यो जिनेन्द्र महाभिषेक कलशमुखेष्वेतेषु नित्यविशिष्टा भवत भवतेति स्वाहा ।

– स्रग्धरा –

तीर्थेनानेन तीर्थान्तर दुराधिगमोदारदिव्यप्रभाव–

स्फूर्जत्तीर्थोत्तमस्य, प्रथितजिनपतेः, प्रेषितप्रामृतानाम् ।।

श्रीमुख्यख्यातदेवी, निवहकृतमुखाद्यासनोद्भूतशक्ति – ।

प्रागल्भ्यानुद्धरामो, जयजयनिवदे, शातकुंभीयकुंभान् ।।

ओं ह्रीं आरणेन्द्र ! अत्र -----

ओं ह्रीं आरणेन्द्राय इदं ---स्वाहा ।।११।।

ओं ह्रीं अच्युतेन्द्र ! अत्र -----

ओं ऱ्हीं अच्युतेन्द्राय इदं ---स्वाहा ।।१२।।

– पूर्णार्घ्य –

**हस्तान् सप्त षडेव पंच चतुर–स्त्रीनर्धयुक्तानथ ।**
**त्रीनुत्सेधमुशंति जैनमुनयो, येषु द्वयोश्च द्वयोः ।।**
**तेऽमी सारसुखानुभावकलिता नन्दन्ति चेदंतिच ।**
**स्वर्लक्ष्मीपतयः सदा विदधतां, शांतिं सतामर्चिताः ।।**

ओं ह्रीं सौधर्मादि द्वादश कल्पेन्द्राः इदं अर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरूं दीपं धूपं फलं स्वस्तिकं बलिं यज्ञभागं च यजामहे प्रतिगृह्यतां प्रतिगृह्यतां यजमान प्रभृतीनां शांतिं कुरुत कुरुत स्वाहा ।। पूर्णार्घ्यः।।

## * पंचकल्याणक व इन्द्रध्वजादि विधानोंमें होनेवाला झंडारोहण विधि *

अंकुरारोपण होने के बाद झंडारोहण विधि करे । झंडारोहण विधि पंचकल्याणक में किया जाता है या बडे विधानोंमें । झंडारोहण के लिए पांडाल के सामने तीन कटनी वाली वेदी बनावें । उसमें विधिपूर्वक झंडारोहण करे । प्रथम बृहत शांतिचक्र विधान करके, उस शांतिचक्र विधान में प्रथम जयादि देवियों की, फिर सोलह विद्या देवियों की चौबीस यक्षों की बत्तीस इंद्रों की दस दिकपालों की चौबीस यक्षियों की नवग्रहों की और अनावृत यक्ष की पूजा करें । नवग्रह होम करे जिनेन्द्र भगवान का पंचामृताभिषेक करें तथा जिनेन्द्र पूजा करें । झंडे का चित्र चित्र में देख लेवे ।

## झंडा रोहण विधि

श्रीमज्जिनस्य जगदीश्वरता ध्वजस्य ।
मीन ध्वजाद्रिरिपुलाल जय ध्वजस्य ।।
तन्न्यासदर्शन जनागमन ध्वजस्य ।

**चारोपणं विधिवदाविदधेध्वजस्य ।।**

ओं ह्रीं श्रीं भू: स्वाहा (विधियज्ञ प्रतिज्ञापनाय पुष्पांजलिः ।)

**श्रीमद् विगानाभिमुखध्वजस्थं, यक्षं प्रसूनांजलिभिः समंत्रम् ।**

**आहूय संस्थाप्य च संनिधाप्य, प्रसादये दिक्पतिदिक्कुमारी ।।**

ओं ह्रीं सर्वाह्न यक्षसहिताः सर्वध्वजदेवताः ! अत्र आगच्छत आगच्छत संवौषट् ।

ओं ह्रीं ............अत्र तिष्ठत तिष्ठत ठः ठः ।

ओं ह्रीं ...........अत्र मम सन्निहिता भवत भवत वषट् ।

( ''अभिनव'' आदि श्लोक बोलकर ८ कलश स्थापित करें । इन कलशों के पास मंगल द्रव्य आदि स्थापित करें पुनः आगे लिखित 'ओं ऱ्हां' आदि मंत्र पढते हुए उन कलशों में जल डाले । 'ओं ह्रीं स्वस्तये' मंत्र बोलकर कलशों को स्थापित करने हेतु उन पर पुष्पांजलि छोडें । अनंतर 'स्वच्छै' इ. श्लोक बोलकर कलशों को अर्घ्यं चढावे ।

– मालिनी –

**अभिनवनवकुंभान्पुण्यतीर्थाम्बुपूर्णान् ।**
**विधिवदिह निवेश्याभ्यर्च्य यक्षध्वजाग्रे ।।**
**कलशनिकटदेशे सर्वतः स्थापयामि ।**
**प्रकृतयजनयोग्यं मंगलद्रव्यजालम् ।।**

ओं ह्रां ह्रीं ऱ्हूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमत् पद्म महापदमतिगिंछ केशरि महापुंडरीक पुंडरीक गंगा सिन्धु रोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदा नारीनरकांता सुवर्णकूलारूप्यकूलारक्तारक्तोदाक्षीरांभोधिजलं सुवर्ण घटं प्रक्षिप्तसर्वगंध पुष्पाढ्यं आमोदकं पवित्रं कुरु कुरु झौं झौं वं वं मं हं सं तं पं स्वाहा । (जलाभिमंत्रण कलशों में जल डालें) (चावलों का स्वस्तिक बना कर कलश रखें । ओं ह्रीं स्वस्तये कलशस्थापनं करोमि स्वाहा। (कलशों को स्थापित करें)

– शार्दूल –

**स्वच्छैस्तीर्थजलैरतुच्छसहज – प्रोद्गंधिगंधैः सितैः ।**

**सूक्ष्मत्वायतिशालिशालिसदकै– गंधोद्गमैरूद्गमैः ।।**

**हव्यैर्नव्यरसैः प्रदीपितशुभै–र्दीपैर्विपद्धूपकैः ।**

**धूपैरिष्टफलावठैर्बहुफलैः कुंभान्समभ्यर्चये ।।**

ओं ह्रीं नेत्राय संवौषट् कलशार्चनं करोमि स्वाहा ।

**अथ गंधाक्षत पुष्पफलादि मंगलोपकरणस्थापनम् ।**

(जो नव कलश जलसे भरे है, उनसे दर्पण में प्रतिबिम्बित सर्वाण्हयक्ष का अभिषेक करे या मूर्ति का करे)

**तत्कुंभवार्भिर्वरमंत्रपूतैः सत्संमुखीनंप्रतिबिंबितानाम् ।**

**यक्षादिसर्व ध्वज देवतानां संप्रोक्षणं सांप्रतमातनोमि ।।**

ओं ह्रीं सर्वाह्णयक्षसहित सर्वध्वजदेवते इदं स्नानं गृहाण गृहाण
ओं सर्व राष्ट्र क्षुद्रोपद्रवं हर हर ओं स्वस्ति भद्रं भवतु स्वाहा (संप्रोक्षणं)

– मालिनी –

**अभिमुखनिहित श्रीदर्पणेयक्षनायं ।**

**प्रतिफलिततनुं श्रीचंदनानुलिप्य ।।**

**ध्वजविलिखितकाष्ठानाथदिक्कन्यकानां ।**

**मुकुरमुपगतानांतेन तन्वेऽनुलेपम् ।।**

ओं ह्रीं श्रीं अर्हं नमः अरिहंताणं सर्वाह्णयक्षाय धर्मचक्रविराजिताय चतुर्भुजाय सुवर्णवर्णाय गजारूढाय सर्वजननयनाह्लादकाय सुगंधानुलेपनं करोमि स्वाहा।

# मुखवस्त्रदान विधि

अनुष्टप – कांडादिमंडितादभ्र – श्रीकांडपटमुज्वलं ।
यक्षस्य संप्रयच्छामि सर्वधान्यादिसंभृतम् ।।

ओं ह्रीं श्रीं अर्हम् नमः सर्वाह्नयक्षस्य मुखवस्त्रमहं प्रक्षिपामि स्वाहा
(मुखवस्त्रप्रदानम् । सामने पर्दा डाले)

## - नेत्रोन्मीलन विधि -

('ध्वजविरचित' आदि श्लोक पढकर व मंत्र पढते हुए नेत्रोन्मीलन विधि करें । एक सुवर्ण कटोरी में दूध शक्कर और कपूर मिलाकर रखें, सोने की सलाई से उसे लेकर सर्वाह्नयक्ष के नेत्रोंमें लगावें । यही नेत्रोन्मीलन विधि है ।)

– मालिनी –

**ध्वजविरचितमूर्तेयक्षनाथस्य सद्यो ।**
**हिमसितयुतदुग्धैः स्वर्णपात्रोपयुक्तैः ।।**
**कनकमयशलाकाग्राह्यतैर्वल्गु लग्ने ।**
**विधियुतमिह नेत्रोन्मीलनं संविदध्मः ।।**

ओं ह्रीं श्रीं अर्हम् नमः णमो अरिहंताणं सर्वाह्नयक्षायश्यामवर्णाय यथोक्त लक्षणलक्षिताय सर्वजननयनाह्लादकराय नयनोन्मीलनं करोमि स्वाहा ।

## सर्वाह्नयक्ष का अर्घ

– शार्दूल –

**उत्तुंगं शरदभ्रशुभ्रमुचितं सद्विभ्रमं बिभ्रतं ।**
**यो दिव्यद्विपमारूरोह शिरसि श्रीधर्मचक्रं दधौ ।।**
**हस्ताभ्यामसितद्युतिं करयुगे–नान्येन बद्धांजलिं ।**
**तं जैनाध्वररक्षणक्षममिमं सर्वाह्नयक्षं यजे ।।**

ओं ह्रीं सर्वाह्नयक्षाय इदं अर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरू दीपं धूपं फलं स्वस्तिकं यज्ञ भागं च यजामहे प्रतिगृह्यतां प्रतिगृह्यतां स्वाहा ।

## इंद्रादिदिक्पाल का अर्घ

**श्रीमत् सर्वजनीन जैनसवनप्रत्यूहविध्वंसन ।**
**प्रोद्भूताऽप्रतिमप्रभावविहित – प्रख्यातिपूजांचितान् ।।**
**स्वस्वातुच्छपरिच्छदान दशदिशामान्याप्रधृष्यामितान् ।**
**दिक्पालाञ्जगदेकपालक जिनाधीशाध्वरे व्याह्वये ।।**

ओं ह्रीं इंद्रादिदशदिक्पालकेभ्य: इदं अर्घ्यं.... स्वाहा ।

## - अष्टदिक्कन्यका अर्घ -

**मेरोर्दक्षिणतो महाकुलकुभृत् पद्माकरांभोरूह ।**
**प्रासादस्थितिका: शचीपति वधू: श्री ऱ्ही धृतीरंबिका: ।।**
**तस्यैवोत्तरतस्तथोत्तर सुरेड्गृह्यांच कीर्तिधियम् ।**
**लक्ष्मीं शांतिकरीच शांतिमिह सत्पुष्टिं च पुष्टिं यजे ।।**

ओं ह्रीं अष्ट दिक्कन्यकाभ्य: इदं अर्घ्यं स्वाहा । (तत: पुरिमहोत्सवेन विहारणम् ।) पूजा विधान करके ध्वज और सवाह्नयक्ष की मूर्ति को हाथी पर विराजमान करके महा उत्सव के साथ जुलुस शहर मे घुमाकर ध्वज स्थापना के स्थान पर लाकर ध्वजदंड का पंचमृताभिषेक आगे लिखित विधि से करना है ।)

## - ध्वजदंड शुद्धि एवं दर्भमालावेष्टन -

**समंतत: श्रीध्वजदंडमग्र्यं, प्रक्षाल्य सर्वौषधिमिश्रवार्भि: ।**
**अश्वत्थकंकेलिदलौघभाजा दर्भस्त्रजेनं परिवेष्टयामि ।।**

ओं ह्रीं श्रीं क्ष्वीं नमोऽर्हते श्रीमत्पवित्रजलेन ध्वजदंडशुद्धिं करोमि स्वाहा ।
संप्रोक्षणं ।। (ध्वजदंडपर जल डाले, धोवें, शुद्धि करें ।)
ओं ह्रीं दर्पमभयनाय नम: स्वाहा (दर्भमालावेष्टनम् ।। डाभ की माला पहनावें)

## दर्भतुरा स्थापनविधि

(ध्वजदंड के ऊपर जो तीन कोकिला है उनके अग्रभाग में दर्भ की तुरा बांधे।)

अनुष्टुप - ध्वजदंडाग्रभागस्थ, कोकिलात्रयवर्तिन : ।
वेणुदंडस्य तस्याग्रे बध्नामि कुशकूर्चिकां ।।

ओं ह्रीं दर्पमथनाय नम: । (वेणुयष्ट्यग्रे कुशकूर्चस्थापनम् ।।
(तुरा-लंबी कूंची बांधे)

## * ध्वजदंड का पंचामृत अभिषेक *

(आगे का श्लोक पढकर अनादि सिद्धमंत्र द्वारा ध्वजदंड का पंचामृताभिषेक करें। पुन: 'नीरजसे नम:' आदि ये अष्ट द्रव्य चढा कर स्वच्छैस्तीर्थ --से अर्घ्य चढावें)

**ज्ञानशक्तिमयीं मत्वा ध्वजदंडाग्रचूलिकां ।**

**अनादिसिद्धमंत्रेण पंचभिः स्थापयेऽमृतैः ।।**

ओं णमो अरिहंताणं । ओं णमो सिद्धाणं । ओं णमो आइरियाणं । ओं णमो उवज्झायाणं । ओं णमो लोए सव्व साहूणं । चत्तारिमंगलं–अरिहंतमंगलं सिद्ध मंगलं । साहू मंगलं । केवलिपण्णत्तो धम्मो मंगलं । चत्तारि लोगुत्तमा–अरिहंत लोगुत्तमा । सिद्ध लोगुत्तमा । साहू लोगुत्तमा । केवलि पण्णत्तो धम्मो लोगुत्तमा। चत्तारि सरणं पव्वज्जामि–अरिहंत सरणं पव्वज्जामि । सिद्ध सरणं पव्वज्जामि । साहू सरणं पव्वज्जामि । केवलि पण्णत्तो धम्मो सरणं पव्वज्जामि । ओं ह्रौं शान्तिं कुरु कुरु स्वाहा । (अनादि सिद्धमंत्रः) अवेन ध्वजदंडस्य पंचामृस्नपनम् (इस मंत्र से पंचामृताभिषेक) ओं नीरजसे नमः स्वाहा । शीलगंधाय नमः गंधं । अक्षताय नमः अक्षतान् । विमलाय नमः पुष्पं । दर्पमथनाय नमः नैवेद्यं । ज्ञानोद्योताय नमः दीपं । श्रुतधूपाय नमः धूपं । परमसिद्धाय नमः फलं ।

– शार्दूल –

**स्वच्छैस्तीर्थजलैरतुच्छसहज – प्रोद्गांधिगंधैः सितैः ।**

**सूक्ष्मत्वायतिशालि शालि सदकै – गंधोद्गमैरूदगमैः ।।**

**हव्यैर्न व्यरसैः प्रदीपितशुभै :– र्दीपैर्विपद्धूपकैः ।**

**धूपैरिष्ट फलावहैर्बहुफलै : दण्डं ध्वजस्थार्चये ।।**

ओं ह्रीं ध्वजदंडाय संवौषट् ध्वजदंडार्चनं करोमि स्वाहा । (अर्घ्य चढावे)

## * ध्वजदंड रोपने के गर्त भूमि का अर्चन *

(आगे का श्लोक बोलकर जहां ध्वजदंड स्थिर करना है, उस गड्ढे में दूध, दही और धान्य स्थापित करके अष्ट द्रव्य से पूजा करके हिरण्य – सुवर्णयुक्त खीर वहां रखें पुनः ध्वजदंड वहां स्थापित करें।)

**विन्यस्य दूर्वादधिमिश्रधान्यं भूम्यर्चनासंविधिना समर्च्य ।**

**हिरण्ययुक्तं परमान्नमेतन् न्यसामि शस्ते ध्वजदंडगर्ते ।।**

(दूर्वादधिमिश्रधान्यस्थापनम्)

ओं नीरजसे नमः जलं । शीलगंधाय नमः गंधं । अक्षताय नमः

अक्षतान् । विमलाय नमः पुष्पं । परमसिद्धाय नमः चरू। ज्ञानोद्योतनाय नमः दीपं। श्रुतधूपाय नमः धूपं । अभीष्टफलदाय नमः फलं ।

(इति गर्तभूम्यर्चनम्) सुवर्ण सहित खीर की स्थापना करे – गड्ढे में डाल देवे । अनंतर ध्वजदंड स्थापित करे और दिकपाल आदि स्थापन,लघुध्वजदंड स्थापन)

**अधिवासयेऽधिकर्द्धिं सार्वं सर्वाह्णयक्षमिमम् ।**

**अष्टोत्तरशतवारं संजप्यानादिसिद्ध मंत्रेण ।**

(णमोकार मंत्र का १०८ बार जाप्य)

## * सर्वाह्णयक्ष का पंचामृताभिषेक *

यदि सर्वाह्णयक्षका कपडे आदि पर चित्र है तो उसे दर्पण में प्रतिबिंबित कर दर्पण का अभिषेक करे । यदि मूर्ति व यंत्र है तो उसी का अभिषेक करें ।

वसंत –**श्रीमज्जिताघजिनबिंबहटत्तिरीटं,सर्वज्ञयज्ञविधिरक्षणदक्षयक्षम्।**

**पंचामृतैरमृतभव्यसुखार्थिभव्यमूर्धा भिषिक्त मभिषिक्तमिमं तनोमि**

(अनादिसिद्धमंत्रेण पंचामृतस्नपनम् । (चत्तारि मंगल ....बोलकर)

– शार्दूल –

**स्वच्छैस्तीर्थजलैरतुच्छसहज– प्रोद्गंधिगंधैः सितैः ।**

**सूक्ष्मत्वायतिशालिशालिसदकै – गंधोद्गमैरूद्गमैः ।।**

**हव्यैर्नव्यरसैः प्रदीपितशुभै र्दीपैविपद्धूपकै : ।**

**धूपैरिष्ट फलावहैर्बहुफलैः यक्षं समभ्यर्चये ।।**

ओं ह्रीं सर्वाह्णयक्ष इदं जलादिक अर्घ्यं गृहाण गृहाण स्वस्ति भद्रं भवतु स्वाहा।

(अथ यक्षाग्रे सर्वलोकशान्त्यर्थमिष्ट प्रार्थनामालामंत्र घोषणम्)

– शार्दूल –

**तीर्थेशानवदेवता बहुविधाः सर्वे जयाद्याः सुराः ।**

**योगीन्द्रा महिताः त्रिषष्टिपुरुषा –स्तत्त्वप्रबोधादयः ।।**

**राज्ञोऽमात्यवरादिसर्वतनुभृद्वृन्दस्य राष्ट्रादिक –**

**स्यात्र्यादीन् परिहृत्य नित्यपरमानंदं विदध्युर्भृशं ।।**

**सब्रह्मवृद्धिर्भूयात् सद्धर्मवृद्धिर्भूयात् ।।**

(यजमान को आशीर्वाद रूप में विशेष पढना चाहे तो 'प्रतिष्ठा तिलक' पृ. १९४ पर ॐ जय...)

इह सकलचैत्यालया अकृत्रिमचैत्यालया इव स्वर्णमया रत्नमया ज्योतिर्मया भूयासुरश्रांतम् ।।४८।।

नित्योत्सव मासोत्सव पक्षोत्सव वर्षोत्सव प्रमुखोत्सवानां समृद्धयोऽर्हतां मंदिरेषु भूयासुरश्रांतम् ।।४९।।

भगवज्जिनेश्वर प्रतिमाप्रतिष्ठामहोत्सवप्रारंभेविधीयमानध्वजारोहण मुहूर्तः सुमुहूर्तो भूयात् ।।५०।।

**स जयतु जिनधर्मो यावदाचंद्रतारम् ।**
**व्रतनियमतपोभिर्वर्द्धतां साधुसंघः ।।**
**अहरहरभिवृद्धिं यांतु चैत्यालयास्ते ।**
**तदधिकृतजनानां क्षेममारोग्यमस्तु ।।**

।। इत्याशीर्वाद : ।।

## * ध्वजारोहण मंत्र *

आगे का श्लोक बोलकर व मंत्र बोलकर बाजे बजाते हुए शुभ मुहूर्त में ध्वजा रोहण करे । यहाँ ध्वजदंड में रत्नत्रय और ध्वज में केवल ज्ञान का संकल्प है। सभी लोग णमोकार मंत्र का उच्चारण करते रहें ।

– वसंत तिलका –

**रत्नत्रयात्मकतयाभिमतऽत्र दंडे ।**
**लोकत्रयप्रकृतकेवलबोधरूपम् ।।**
**संकल्प्य पूजितमिदं ध्वजमर्च्य लग्ने ।**
**स्वारोपयामि सति मंगलवाद्यघोषे ।।**

ओं णमो अरिहंताणं स्वस्ति भद्रं भवतु । सर्वलोके शांतिर्भवतु स्वाहा ।

सर्वाह्ण यक्ष को अर्घ –

– शार्दूल –

**यज्ञैनेन्द्रमहामहस्य सुतरा–माद्यं विधेयं मतं ।**

यज्जैनोत्सवसंदिदृक्षुजनसंघानक्षरावाहनम् ।।

यल्लोकाखिलदुःखहारिसुखसंतानैकसंपादकम् ।

तच्चारोप्य महाध्वजं विधिकृते–नार्घ्येण संभावये ।।

ओं ह्रीं सर्वाह्णयक्ष इदं अर्घ्यं गृहाण गृहाण स्वस्ति भद्रं च भवतु स्वाहा ।

(इति ध्वजारोहण विधानम्)

## * धामसंप्रोक्षणं *

**(नूतन जिनमंदिर शुद्धि विधान)**

श्रीविमानस्याष्टदिक्षु प्रत्येकं नवकलशान् सर्वौषधिमिश्रतीर्थजलपरिपूर्णान् विधिनासंस्थाप्य समंत्रं श्रीजिनालयं तैरधिवासित कलशैरभिषिच्य पुण्याहमंत्रेण कुशोद्धृत जलेन चैत्यालयमन्तर्बहिश्च परिषिच्य दर्भमालयाभिवेष्ट्या भ्यर्च्य तदग्रे स्थित्वाशिषं पठित्वा जिनधामसंप्रोक्षणमेवं विधातुमिमे वयमुत्सहामहे । (जिनमंदिर के आठों ही दिशाओंमें सर्वौषधि मिश्रित कलशों में जल भरकर प्रत्येक दिशामें नौ–नौ कलश स्थापन करें । मंत्र सहित श्री जिनालय का उन कलशों से अभिषेक करें, पुण्याहवाचनमंत्र बोलकर दर्भयुक्तजलसे जिनमंदिर का अंदर बाहर से सिंचन करे । नवीन जिनमंदिर को दर्भमाला व पंचरंगा धागा (कलावा / मोली) से वेष्टित करें, फिर जिनमंदिर की पूजा करे, जिनमंदिरके आगे खडे होकर आशीर्वादात्मक श्लोक पढकर शांति के लिए मंदिर के चारों दिशाओं में लघु होम विधान करके मंदिर प्रतिष्ठा उत्साह से समापन करे ।

स्वर्मुक्त्योरधिरोहिणीपदमितो, योऽगण्यपुण्यावहः ।

पापापायहरः सतांच शरणं, लोकोत्तमो मंगलम् ।।

पूज्यो नित्यमहादिसाधनतया, धर्मस्यमूलं हितम् ।

रम्यं जैनविमानमेनमधुना तत्कल्पतः शोधये ।।

(पुष्पांजलिः)

## ततः क्षेत्रपालबल्यादि भूम्यर्चनांतां भूमिशुद्धिं विदध्यात् ।

भूशोधनादिं विधिमाविधाय पूर्वादि दिक्षु प्रतिदिग् नवैव ।

**कुंभान् विशुद्धाम्बुभृत: प्रसिद्धान् संस्थाप्य सर्वान् परिपूजयाम:**

ओं ह्रीं स्वस्तये कलशस्थापनं करोमि स्वाहा ।

**श्रीखंड कर्पूर वरादिगंध – द्रव्यप्रसूनोत्तमरिष्ट रत्नम् ।**
**क्षिपामि मध्यस्थमहाघटेऽस्मिन् गलस्थवस्त्रादि विराजमाने ।।**

ओं ह्रां ह्रीं ह्रूं ह्रौं ह्र: नमोऽर्हते भगवते श्रीमते पद्ममहापद्म तिगिंछ केसरि महापुंडरीक पुंडरीक गंगा सिन्धु रोहिद्रोहितास्या हरिद्धरिकांता सीता सीतोदानारीनरकान्ता सुवर्णकूलारूप्यकूलारक्तारक्तोदा क्षीरांभोनिधिजलं स्वर्णघटप्रक्षिप्तं सर्वगंधपुष्पाढ्यं आमोदकं पवित्र कुरू कुरू झ्रौं झ्रौं वं मं हं सं तं पं असिआउसा नम: स्वाहा ।

अनेन मध्यमहाकुंभे रैरत्नादि निक्षेपणं ।।

– शार्दूल –

**स्वच्छैस्तीर्थजलैरतुच्छसहज – प्रोद्गंधिगंधै: सितै: ।**
**सूक्ष्मत्वायतिशालिशालिसदकै–र्गंधोद्गमैरूद्गमै: ।।**
**हव्यैर्नव्यरसै: प्रदीपितशुभै – र्दीपैर्विपद् धूपकै: ।**
**धूपैरिष्टफलावहैर्बहुफलै: कुंभान् समभ्यर्चये ।।**
**ओं ह्रीं नेत्राय संवौषट् कलशार्चनम् ।**

## - जिनालय पूजा -

**स्वर्मुक्त्योरधिरोहिणीपदमितो, योगण्यपुण्यावह: ।**
**पापापायहर: सतश्चशरणं, लोकोत्तमो मंगलम् ।।**
**पूज्यो नित्यमहादिसाधनतया धर्मस्य मूलं हितम् ।**
**त्रैलोक्यस्थजिनालयं तमखिलं, भक्त्या समाह्वानये ।।**

ओं ह्रीं सर्वजिनालया ! अत्र आगच्छत आगच्छत संवौषट् ।
ओं ह्रीं सर्वजिनालया ! अत्र तिष्ठ तिष्ठ ठ: ठ: ।
ओं ह्रीं सर्वजिनालया ! अत्र मम सन्निहिता भवत भवत वषट् ।

**उद्धृत्य कुंभान् परया विभूत्या, तदीयवार्भिर्बहिरंतरश्च ।**

**मंत्रातिपूतैरभिषेचयामि, श्रीजैनगेहं विभवैकगेहम् ।।**

ओं ह्रीं सर्वजिनालया जलाद्यभिषेकं गृण्हीध्वं गृण्हीध्वं नमो जिनालयेभ्य: स्वाहा ।

इत्यनेन मंत्रेण जिनालयं तैरधिवासितकलशैरभिषेचयेत् ।

(इस मंत्र से उन चार दिशा में स्थापित ९-९ कलशोंसे जिनालय का अभिषेक करें या मंदिर के सामने बडा दर्पण रखकर शिखरसमेत प्रतिबिंबित मंदिर का दर्पण में अभिषेक करें ।)

**(ओं) भवन भवन जानां, ज्योतिषां कल्पजानाम् ।**
**मणिमयनिलयस्था, येऽहमिंद्रालयस्था ।।**
**बहुविभवयुता ये ये च मध्ये त्रिलोके ।**
**जिनपतिनिलयास्तांस्तांश्च सर्वान् महामि ।।**

गद्य - ओं रजतमहारजतेन्द्रनीलमरकतमाणिक्यमयमहामानभासुरभित्ति स्तंभशालिशिखरमंडपमहामानस्तंभाद्यंगोपांगसंगताकीर्णपंचवर्णप्रभाजाल प्रभा वाहितविचित्रांबरविलासांबराणाम् ।। संततानादिसंसिद्धहटद्धाटकीयधूपघट पेटकास्यनिर्यद् विश्वतोविसर्पि धूमलेखाजालबहलपरिमल प्रसरसुरभीकृतसकल दिङ्मुखानाम् ।। वंदारूसुरासुरवृदांरकजयजयारावसुरनर्तकीकरकंकण झंकारद्विगुणीकृतानादिघटितघंटाजालझणझण ध्वानबधिरीकृतनिखिल दिङ्मंडला -नाम्।। तम:समूलसमुत्पाटनपटुतावलेपलिप्सागतगभस्तिमालि मंडलायमानहट -द्धाटकीयघटपेटकीयघटपेटकोपघटितचित्तचमत्काराणाम् ।। चकचकायमाननाना -विधोपकरणनिचितनीलतरनिर्जितज्योतिर्गणांकित गगनांगणानाम् ।।समुत्तुंगसुवर्ण -भित्तिभागावलंबमानमणिमालाभूषित मेरूगिरीपार्श्वशोभातिशयानाम् ।। विचित्र विनिर्मापणवदनाभिषेक नर्तन संगीतावलोकनादिमंडपाभिमंडितचैत्यमहीमहितानाम् ।। कुंजराराति कुंजरादिदशविधध्वजराजिसभाजिताद्यद्वितीयशालांतर ध्वजधराविराजितानाम् ।। चतुर्दिग्गताशोकसप्तच्छदचंपकाम्रचतुर्वनांचिततृतीय बहि:शालांतरावनीविनुतानाम् ।। चतुर्वीथिपर्यंतगतमहामानस्तंभाहित प्रतितीर्यजनमानस्तंभानाम् ।। सहजसकलपरिष्काराणामकृत्रिमाणा

महार्यविविधालंकारणामपि कृत्रिमाणां ।। मंगललोकोत्तमशरणभूतानाम् ।। भगवज्जिनचैत्यालयानामष्टतयीमिष्टिं करोमि स्वाहा ।

**ओं ह्रीं सर्वजिनचैत्यालया जलं गृण्हीध्वं गृण्हीध्वं नमः ।**

**ओं ह्रीं सर्वजिनचैत्यालया गंधं गृण्हीध्वं गृण्हीध्वं नमः ।**

एवं अक्षतादि । (इसी प्रकार से अक्षतादि आठों द्रव्य चढावें ।)

शार्दूल - **स्वच्छैस्तीर्थजलैरतुच्छसहज - प्रोद्गंधिगंधैः सितैः ।**
**सूक्ष्मत्वायतिशालिशालिसदकै - गंधोद्गमैरूद्गमैः ।।**
**हव्यैर्नव्यरसैः प्रदीपितशुभै-दीपैर्विपद् धूपकैः ।**
**धूपैरिष्टफलावहैर्बहुफलैः चैत्यालयान्संयजे ।।**

ओं ह्रीं सर्वजिनचैत्यालयाः अर्घ्यं गृण्हीध्वं गृण्हीध्वं नमः ।

(मंदिरके आगे खडे होकर नीचे लिखे अनुसार आशीर्वादात्मक श्लोक बोलें।)

आर्या - **शिवमस्तु सर्वजगतां, परहितनिरता भवंतु भूतगणाः ।**
**दोषाः प्रयांतु नाशं, तिष्ठतु जिनशासनं सुचिरम् ।।**

इममाशीर्वादमुद्घोषयेत् ।

– मालिनी –

**सजयतु जिनधर्मो यावदाचंद्रतारं ।**
**यमनियमतपोभिर्वर्द्धतां साधुसंघः ।।**
**अहरहरभिवृद्धिं यांतु चैत्यालयास्ते ।**
**तदधिकृतजनानां क्षेममारोग्यमस्तु ।।**

। इत्याशीर्वादः ।

अथ शांतिशुद्ध्यभिधान होमविधेः प्रयोगः (शांतिशुद्धि होमविधि)

(चैत्यालय की चारों दिशाओं में चौकोन १-१ कुंड बनवाकर होम मंडप बनावे पुनः पुण्याहवाचन आदि विधि करें, उसे ही दिखाते है ।)

गद्य - अथ चैत्यालयस्य चतुर्दिक्षु विधिविहित चतुरस्रचतुः कुंडविराजमान समुचितालंकारोपेतहोममंडपे संकल्पपूर्वक पुण्याहवाचनां, भूमिशोधन विधानं, होमकुंड पश्चिमपार्श्वे सिद्धपूजनमासनस्थापनादिदिक्पालपूजा पर्यंतं

अग्निमुखविधिं, तदनंतरमाज्याहुतिं, पुनरप्याज्येन पूर्णाहुतिं पुण्याहवाचनामग्रेरर्चनं, स्तवनादिविधिं, होमार्थमाहूतदेवताविसर्जनं विधातुमिमे वयमुत्सहामहे ।। पुष्पाञ्जलिः ।।

इस प्रकार पूजा करके मंदिर के चारो कोणों में होमकुंड की रचनाकर लघु होम विधान करें, शांतिविसर्जन करके मंदिर प्रतिष्ठा समाप्त करें ।

**नोट :-** मंदिर प्रतिष्ठा में भी वेदी – प्रतिष्ठा के समान ही भूमि शुद्धि, भूमि पूजा, क्षेत्रपाल पूजा करना चाहिए, वहाँ देख लेवें ।

# - प्रतिष्ठा तिलक -

### ❊ मंदिर प्रतिष्ठा व वेदीप्रतिष्ठा ❊

यदि अलग से वेदी प्रतिष्ठा करना है तो कम से कम तीन दिन का महोत्सव रखना चाहिए, अगर मंदिरजी में बडा कमरा हो तो वहाँ महोत्सव करें अथवा अलग से बडा पांडाल लगवाकर वेदी प्रतिष्ठा महोत्सव करें, निर्ग्रंथाचार्य संघ के सानिध्य में धर्मात्मा जीवों को महोत्सव में बुलाकर इस उत्सव को करे, जिन मंदिर को सुशोभित करें, खूब सजावें, एक अच्छी आमंत्रण पत्रिका छपवाकर, सभी चतुर्विध संघ को आमंत्रित करें, शुभ मुहूर्तमें इस कार्य को संपन्न करें ।

### प्रथम दिन का कार्य

श्रावक श्राविका प्रतिष्ठाचार्य इन्द्र इन्द्राणि प्रातः स्नानकर शुद्ध वस्त्र पहनकर ईर्यापथशुद्धि पूर्वक जिनमंदिरजी में आवें । मंदिर की तीन प्रदक्षिणा लगाकर भगवान को नमस्कार करें । आचार्य निमंत्रण होने के बाद संध्यावंदन क्रिया करे । फिर इन्द्र इन्द्राणि मिलकर जिनाभिषेक के लिए घटयात्रा विधि के अनुसार जलभर लावें, अभिषेक करे, फिर झंडारोहण विधि करें, कोई भी एक मंत्र का साढे बारह हजार जाप्य के लिए जाप्य प्रारंभ करवावें । नित्यनियमपूजा कर प्रात:काल की विधि समाप्त करें । चतुर्विध संघ को आहारादि देकर, पुनःसब लोग मंदिरजीमें आजावें मध्याह्न में शांतिचक्र विधान या पंचपरमेष्ठि विधान करें । उसके लिए सकलीकरण इन्द्रप्रतिष्ठा वेदी प्रतिष्ठा पंचकुमार पूजा,

दश दिक्पाल पूजा, स्वस्तिनयन, महर्षि उपासनादि करके मूलविधानकी पूजा कर रात्रि में भजन आरती सांस्कृतिक नाटकादि करके समाप्त करें ।

## द्वितीय दिन का कार्य

प्रात: स्नानादि क्रिया से निवृत्त होकर शुद्ध वस्त्र पहनकर मंदिरजी में जावें, तीन प्रदक्षिणा लगावें - मंदिर की, ईर्यापथशुद्धि करके भगवान को नमस्कार करे, पुन: सामायिक वंदना करके जिनेन्द्र भगवान का पंचामृताभिषेक करें । सामायिक वंदना करके जिनेन्द्र भगवान का पंचामृताभिषेक करें । जाप्यादिक करके नित्यपूजा करें । आहारदानादि देकर मध्याह्न में वेदीशुद्धि के लिए घट-यात्रा महोत्सवपूर्वक ८१, ११ या ५ कलशों में प्रासुक किया हुआ कुआं वापिका से, बडे धूम-धामसे गाजे-बाजे के साथ इंद्राणियाँ केशरिया लाल पीले कपडे पहनकर सौभाग्यवतियाँ जलभर के लावें । वेदी शुद्धि की समस्त क्रियाको संपन्न करें । रात्रि में आरती शास्त्रसभा भजन सांस्कृतिक कार्यक्रम - समाप्त ।

## तीसरे दिन का कार्य

प्रात: स्नानादिक से निवृत्त होकर शुद्ध वस्त्र धारण कर मंदिरजी में आवें, तीन प्रदक्षिणा लगाकर, ईर्यापथशुद्धि करके भगवान को नमस्कार करे, संध्या-वंदनादि करके जिनाभिषेक करें, नित्य पूजा जाप्यानुष्ठान पूर्ण करे, समस्त इंद्र - इंद्राणियाँ मिलकर होम करे, जाप्य के दशांश आहूति देवे, हवन समाप्ति के बाद सब विसर्जन करें । चतुर्विध संघ को आहारादि दान देवें

मध्याह्न में प्रतिष्ठाचार्यादि का दान - दक्षिणा देकर सम्मान करें, अतिथियों का सत्कार करें, रथोत्सव निकाले । रात्रि में आरती शास्त्र सभा भजन आदि करके महोत्सव का समापन करें ।

## वेदी प्रतिष्ठा की मूल विधि

घट - यात्रा द्वारा लाये हुए जलकलश नये मंदिर में या वेदी प्रतिष्ठा के स्थानपर लावें । एक मिट्टी के घडे में बड पीपल उमर गूलर जामुन आम,

अर्जुन, अशोक, पलास, कटहल और चंपा इन सब वृक्षों की एक-एक तोला छाल मंगवाकर १ सेर पाणी में मिलावें । फिर उसको अच्छी तरह उबालें, छानकर एक बर्तन में रखले, कुछ पांच कलशों के पानी में उस काढा को और अष्टगंध, वासक्षेप, चन्दन चूरा, लवंग चूर्ण, जायफल चूर्ण, सर्वौषधि इन सबको मिला दिया जाय, मृत्तिकानयन द्वारा लायी हुई मिट्टी अथवा ऐसे ही खेत की शुद्ध मिट्टी लावें ।

## * वेदी प्रतिष्ठा संबंधी भूमि पूजन *

ओं घंटादिवाद्यं उद्घोषयामि स्वाहा ।

(बाजों पर पुष्पाञ्जलि क्षेपणकर घंटा मजीरा ढोलक आदि बाजे बजाकर जय जय ध्वनि करे ।)

ओं ह्रीं परमब्रह्मणे नमो नमः । स्वस्ति स्वस्ति जीव जीव नंद नंद वर्द्धस्व वर्द्धस्व विजयस्व विजयस्व अनुशाधि अनुशाधि पुनीहि पुनीहि पुण्याहं पुण्याहं मांगल्य मांगल्यं पुष्पाञ्जलिः ।। सोदकानि पुष्पाणि क्षिपेत्

ओं ह्रीं अत्रस्थित क्षेत्रपालाय स्वाहा ।

ओं ह्रीं वास्तुदेवाय इदमर्घ्यं यजामहे प्रतिगृह्यतां प्रतिगृह्यतां स्वाहा ।

ओं ह्रीं वायुकुमारदेवाय सर्वविघ्नविनाशनाय इदं अर्घ्यं यजामहे प्रतिगृह्यतां प्रतिगृह्यतां ।। महीं पूतां कुरु कुरु हुं फट् स्वाहा । (षड्दर्भपूलेन भूमिं सम्मार्जयेत्)

ओं ह्रीं मेघकुमाराय सर्वविघ्नविनाशनाय इदमर्घ्यं प्रतिगृह्यतां प्रतिगृह्यतां । धरां प्रक्षालय प्रक्षालय अं हं सं वं झं ठं यक्ष फट् स्वाहा । (षड्दर्भपूलोपात्त जलेन भूमिं सिंचेत्) (डाभ के पूले से जल लेकर भूमि पर छिडके, ६ तिनके से)

ओं ह्रीं अग्निकुमाराय इदमर्घ्यं प्रतिगृह्यतां प्रतिगृह्यतां । भूमिं ज्वालय ज्वालय अं हं सं वं झं ठं यक्ष फट् स्वाहा । (डाभ या कपूर जलाकर भूमि शुद्ध करें ।)

ओं ह्रीं क्रों षष्टिसहस्रसंख्येभ्यो नागेभ्यः स्वाहा । इदमर्घ्यं....

(नागतर्पनार्थमैशान्यां दिशि जलांजलिं क्षिपेत् । (ईशान दिशामें जलांजलि देवें ।)

# दर्भस्थापन विधि

प्रकृतक्रमविध्यवधानाय पुष्पाञ्जलि: ।। (पुष्पांजलि क्षेपण करे ।)
ओं ह्रीं दर्पमथनाय नम: स्वाहा । (ब्रह्मस्थानमें दर्भ स्थापना करें – ब्रह्मदर्भ:)
ओं ह्रीं अनन्तज्ञानाय अनंतदर्शनाय अनंतवीर्याय अनंतसुखाय पूर्वदिङ्मुखे दर्भमवस्थापयामि नम: स्वाहा । (इंद्रदर्भ: पूर्व दिशामें दर्भ स्थापित करें)
ओं ह्रीं ब्रह्मणे स्वाहा । प्रजापतये स्वाहा । जिनाय स्वाहा । जिनोत्तमाय स्वाहा। धवाय स्वाहा । धवोत्तमाय स्वाहा । शुचिष्ठाशुचिष्ठेषु स्वाहा । कोणाकोणेषु स्वाहा। (अग्निदर्भ: आग्नेयां दिशि दर्भमवस्थापयामि स्वाहा । अग्निदर्भ:)
ओं ह्रीं अनंतवीर्याय स्वाहा। जितेन्द्रियाय स्वाहा।(यमदर्भ: दक्षिण दिशामें दर्भ)
ओं ह्रीं परमब्रह्मणे नैऋत्यां दिशिदर्भ व्यवस्थापयामि स्वाहा । (नैऋत्यदर्भ:)
ओं ह्रीं परममंगलाय परमपवित्राय परमनिर्वाण कारणाय स्वाहा । (वरूण दर्भ:)
ओं ह्रीं पंचमहाकल्याण संपूर्णाय। वायव्यं । दिशि दर्भमवस्थापयामि स्वाहा । (वायु दर्भ: वायव्य दिशा में)
ओं ह्रीं त्रैलोक्यनाथाय त्रिलोकमहिताय शुचिरत्नत्रयदर्शनकराय उत्तरस्यां दिशि दर्भमवस्थापयामि स्वाहा । (यक्ष दर्भ : उत्तर दिशामें)
ओं ह्रीं नवकेवललब्धिसहिताय देवाधिदेवाय । ऐशान्यं दिशि दर्भमवस्थापयामि स्वाहा ।। (ईशान दर्भ:)
इति दर्भस्थापन विधानम् ।
ओं ह्रीं नीरजसे नम: जलं । शीलगंधाय नम: गंधं । अक्षताय नम: अक्षतान् विमलाय नम: पुष्पं । दर्पमथनाय नम: चरू । ज्ञानोद्योताय नम: दीपं । श्रुतधूपाय नम: धूपं । परमसिद्धाय नमं फलं । इति भूम्यर्चनम् । (अष्टद्रव्य से भूमि पूजा करना ।

भूमिपूजन होने के बाद इन्द्राणियोंके द्वारा नवीन वेदी में मिट्टी के ११–११ पुंज में रखवाये जांय । प्रतिष्ठाचार्य अमृतबीजमंत्र से प्रौक्षिणी द्वारा वेदी का सिंचन करावे । उन घडों से पानी लेकर मिट्टी मिलाकर ओं क्षां क्षीं क्षूं क्षौं क्ष: स्वाहा । इस मंत्र से महिलाओंके द्वारा वेदी धुलवावे । फिर उन पाँच घडों के

काढे से व अलग बर्तन में रखे हुए काढेसे वेदीको धुलवावे । ५ अथवा ८१ कलशों को मंत्र पूर्वक वेदी पर ढुलवावे ।

## * ८१ घटों से वेदी शुद्धि मंत्र *

१. ओं ह्रीं इन्द्र कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२. ओं ह्रीं अग्नि कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३. ओं ह्रीं यम कलशेन वेदीशुद्धिं करामीति स्वाहा ।
४. ओं ह्रीं नैऋत्य कलशेन वेदीशुद्धिं करामीति स्वाहा ।
५. ओं ह्रीं वरूण कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
६. ओं ह्रीं मारूत कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
७. ओं ह्रीं कुबेर कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
८. ओं ह्रीं ईशान कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
९. ओं ह्रीं गारून्मत कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१०. ओं ह्रीं मरकतमणि कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
११. ओं ह्रीं गाङ्गेय कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१२. ओं ह्रीं हाटक कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१३. ओं ह्रीं हिरण्य कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१४. ओं ह्रीं कनक कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१५. ओं ह्रीं अष्टापद कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१६. ओं ह्रीं महारजत कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१७. ओं ह्रीं आनन्द कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१८. ओं ह्रीं नन्दन कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
१९. ओं ह्रीं विजय कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२०. ओं ह्रीं अजित कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२१. ओं ह्रीं अपराजित कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२२. ओं ह्रीं शतानन्द कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

२३. ओं ह्रीं स्नानद कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२४. ओं ह्रीं कुन्द कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२५. ओं ह्रीं मलिकाख्य कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२६. ओं ह्रीं चम्पक कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२७. ओं ह्रीं कदम्ब कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२८. ओं ह्रीं मन्दार कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
२९. ओं ह्रीं पारिजात कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३०. ओं ह्रीं सन्तानक कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३१. ओं ह्रीं हरिचन्दन कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३२. ओं ह्रीं कल्पवृक्ष कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३३. ओं ह्रीं जपा कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३४. ओं ह्रीं विशाल कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३५. ओं ह्रीं भद्रकुम्भ कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३६. ओं ह्रीं पूर्णकुम्भ कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३७. ओं ह्रीं जयन्त कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३८. ओं ह्रीं वैजयन्त कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
३९. ओं ह्रीं चन्द्र कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४०. ओं ह्रीं सूर्य कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४१. ओं ह्रीं लोकालोक कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४२. ओं ह्रीं त्रिकूट कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४३. ओं ह्रीं उदयाचल कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४४. ओं ह्रीं हिमाचल कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४५. ओं ह्रीं निषध कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४६. ओं ह्रीं माल्यवत् कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४७. ओं ह्रीं सत्पात्र कलशेन वेदीशुद्धिं करोमीति स्वाहा ।
४८. ओं ह्रीं गन्धमादन कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

४९. ओं ह्रीं सुदर्शन कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५०. ओं ह्रीं मन्दर कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५१. ओं ह्रीं अचल कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५२. ओं ह्रीं विद्युन्मालि कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५३. ओं ह्रीं चूडामणि कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५४. ओं ह्रीं गुल्लिका कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५५. ओं ह्रीं दक्षिणावर्त कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५६. ओं ह्रीं कोक कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५७. ओं ह्रीं राजहंस कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५८. ओं ह्रीं हरिन कलशेन वेदीशुद्धिं करोमीति स्वाहा।
५९. ओं ह्रीं मृगेन्द्र कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६०. ओं ह्रीं कोकनद कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६१. ओं ह्रीं काल निधि कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६२. ओं ह्रीं पद्म कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६३. ओं ह्रीं महाकाल निधि कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६४. ओं ह्रीं सर्वरत्न कलशेन वेदीशुद्धिं करोमीतिस्वाहा।
६५. ओं ह्रीं पाण्डु कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६६. ओं ह्रीं नैसर्प कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६७. ओं ह्रीं माणव कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६८. ओं ह्रीं शङ्ख निधि कलशेन वेदीशुद्धिं करोमीति स्वाहा।
६९. ओं ह्रीं सर्वार्थसिद्धि कलशेन वेदीशुद्धिं करोमीति स्वाहा।
७०. ओं ह्रीं पिंगल कलशेन वेदीशुद्धिं करोमीति स्वाहा।
७१. ओं ह्रीं पुष्करावर्त कलशेन वेदीशुद्धिं करोमीति स्वाहा।
७२. ओं ह्रीं मकरध्वज कलशेन वेदीशुद्धिं करोमीति स्वाहा।
७३. ओं ह्रीं ब्रह्म कलशेन वेदीशुद्धिं करोमीति स्वाहा।
७४. ओं ह्रीं सुवर्ण कलशेन वेदीशुद्धिं करोमीति स्वाहा।

७५. ओं ह्रीं इन्द्रनील कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

७६. ओं ह्रीं अशोक कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

७७. ओं ह्रीं पुखराज कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

७८. ओं ह्रीं कुमुद कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

७९. ओं ह्रीं सम्यग्दर्शन कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

८०. ओं ह्रीं सम्यग्ज्ञान कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

८१. ओं ह्रीं सम्यक्चारित्र कलशेन वेदीशुद्धिं करोमीति स्वाहा ।

## अथदिग्बन्धन

**वामायामथ तर्जन्यां न्यस्यैवं पंचमंत्रकः ।**
**पूर्वादि दिक्षु रक्षार्थं दशास्वपि निवेशयेत ।।**

प्रतिष्ठाचार्य अपने बायें हाथ की तर्जनी अंगुली पर णमोकार मंत्र का न्यास करें, फिर उस उंगली को पूर्वादिदिशाओंमें मन्त्र पढते हुए घुमाते जाए ।

ओं क्षां ह्रां पूर्वे, ओं क्षीं ह्रीं अग्रे, ओं क्षूं ह्रूं दक्षिणे, ओं क्षें ऱ्हें नैऋत्ये, ओं क्षैं ऱ्हैं पश्चिमे, ओं क्षों ऱ्हों वायव्ये, ओं क्षौं ह्रौं उत्तरे, ओं क्षं ऱ्हं ईशाने, ओं क्षः हः अधो, ओं क्षीं ह्रीं ऊर्ध्वे । (इति दिग्बन्धनं)

फिर दस सौभाग्यवती स्त्रियों के हाथों में मूंग, मजीठ, हल्दी, सुपारी, अक्षत, पुष्प, रत्न, दूर्वा, दही, अष्टगंध, वासक्षेप, और सर्वौषधि, इन सभी चीजों को मिलाकर देवे । एक थाली में प्रज्वलित दीपक धूप अग्निपात्र रख कर साथ में ले । एक बडे कलश में दूध तथा दूसरे कलश में अष्टगंध मिश्रित जल इतना लेवें कि चारों ओर पतली धार हो सके । दोनों कलश सौभाग्यवती स्त्रियों को देवें । एक आदमी को खंत्री देकर साथ में रख लेवें । मंदिर प्रतिष्ठा के लिए खंत्री जरूरी है ।)

गृहस्थाचार्य अपने हाथ में मोली का गिंडा या चांदी का पतला तार दिग्बंधनार्थ साथ में लेवे (दाक्षिणात्य परंपरा में दर्भ की रस्सी भी रखते हैं)

ल र श ष व प स ह हा ही वर्णान् सबिंदुकान्

अष्टदिग्पति समेतान् प्रणवादि नमोऽन्तगान्

वेदीप्रतिष्ठा हो तो वेदी के पूर्व में और मंदिर प्रतिष्ठा हो तो मंदिर के पूर्व में एक स्त्री के द्वारा / एक-एक के द्वारा -

(१) ओं ल इन्द्राय अत्रागच्छ-२ इदं अर्घ्यं पाद्यं गंधं जलं अक्षतं पुष्पं नैवेद्यं दीपं धूपं फलं स्वस्तिक यज्ञभागं च यजामहे प्रतिगृह्यतां प्रतिगृह्यतां स्वाहा । (अर्घ्य के साथ महिला के हाथ की (पहली) चीजें चढा देवे । (वहीं से प्रतिष्ठाचार्य दिग्बंधन दूध, अष्टगंधयुक्त जलधार चलें)

(२) ओं रं अग्रे ! अत्रागच्छ ....(दूसरी स्त्री के हाथ की चीजें चढावे)

(३) ओं शं यम ! अत्रागच्छ ....(तीसरी स्त्री के हाथ की चीजें चढावे)

(४) ओं षं नैऋत्य ! अत्रागच्छ ....(चौथी स्त्री के हाथ की चीजें चढावे)

(५) ओं वं वरूणाय ! अत्रागच्छ ....(पांचवी स्त्री के हाथ की चीजें चढावे)

(६) ओं पं पवन ! अत्रागच्छ ....(छठी स्त्री के हाथ की चीजें चढावे)

(७) ओं सं कुबेर ! अत्रागच्छ ....(सातवीं स्त्री के हाथ की चीजें चढावे)

(८) ओं हं ऐशान ! अत्रागच्छ ....(आठवीं स्त्री के हाथ की चीजें चढावे)

(९) ओं ह्रां धरणीन्द्र ! अत्रागच्छ ....(नौमी स्त्री के हाथ की चीजें चढावे)

(१०) ओं ह्रीं सोम ! अत्रागच्छ ....(दसवीं स्त्री के हाथ की चीजें चढावे)

शांतये शांतिधारा, पुष्पांजलिः ।

सिद्ध भक्ति पढकर दिग्बंधन क्रिया समाप्त करें ।

फिर - ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते पद्म महापद्म तिगिंछ केशरी महापुण्डरीक पुण्डरीक गंगासिन्धुरोहिद्रोहितास्या हरिद्धरिकांता सीता सीतोदा नारी नरकांता सुवर्ण कूलारूप्यकूला रक्तारक्तोदापयोधि शुद्धजल सुवर्णघट प्रक्षालित नवरत्न गंधाक्षत पुष्पार्चित मामोदकं पवित्रं कुरु कुरु झं झं झ्रों झ्रों वं वं मं मं हं हं सं सं तं तं पं पं द्रां द्रां द्रीं द्रीं द्रावय द्रावय हं सः स्वाहा ।

इस मंत्र से अभिमंत्रित प्रोक्षिणी के जल से अमृतबीज मंत्र द्वारा पुनः प्रोक्षण किया जाय ।

**चतुष्कोणेषु कुंभांश्चमाला चंदनचर्चितान् ।**

**फलपल्लव वक्त्रस्थान ससूत्रान्स्थापयेत् क्रमात् ।।**

इस श्लोक को पढकर वेदी के चारों कोणों में चार कलशों को संस्कारित करके वेदी के रूप में जमीन पर रखवायें जाय । खाली घडों को उच्चस्थान पर रखवा दिया जाय । फिर वेदी के सामने नंद्यावर्त सांथियाँ बनाकर उसके ऊपर ओं स्वस्तये पुष्पं कुंभं स्थापयामि स्वाहा । इस प्रकार यजमान के द्वारा मंगल कलश स्थापना करवाकर आगे लिखित पूजा करे ।

# * विनायक यंत्र पूजा *

**मुहूर्त सिद्धः कृत सिद्धभक्तिः । विलिख्ययंत्रं सुविनायकाख्यं**

**छत्रत्रयं सिद्ध मुनीश्वरर्द्धि श्रुतानि संस्थाप्य चरेत्सपर्या**

**प्रत्यूहनिर्णाशविधौप्रसिद्धं गणेन्द्र वक्त्राम्बुज गीतकीर्तिं**

**यन्त्रं पुरा पूजितमत्रनेयं पात्रे लिखित्वापि कृतार्चनादि**

पुष्पांजलिः ।

ओं जय-३ निस्सही-३ वर्द्धस्वं-३ स्वस्ति-३ । वर्द्धतां जिनशासनं ।

णमोकारमंत्र पढकर चत्तारि मंगल पढें ।

ओं अद्य वेदी शुद्ध्यर्थं भावशुद्धिः पूर्वक आचार्य भक्ति श्रुतभक्ति पूर्वक कायोत्सर्गं करोम्यहं ।

**अथ स्थापना**

**परमेष्ठिन् मंगलादि त्रय विघ्न विनाशने ।**

**समागच्छ तिष्ठ तिष्ठ मम सन्निहितो भव ।।**

ओं ह्रीं अर्हत्सिद्धाचार्योपाध्याय सर्वसाधु परमेष्ठिन् मंगल लोकोत्तम शरणभूत अत्र-अवतर अवतर संवौषट् । ओं ह्रीं अर्हत्सिद्धाचार्योपाध्याय सर्वसाधु परमेष्ठिन् मंगल लोकोत्तम शरणभूत अत्र तिष्ठ तिष्ठ ठः ठः । ओं ह्रीं अर्हत्सिद्धाचार्योपाध्याय सर्वसाधु परमेष्ठिन् मंगल लोकोत्तम शरणभूत अत्र मम सन्निहितो भव भव वषट् ।।

– अष्टक –

**स्वच्छैर्जलै स्तीर्थ भवै जराय, मृत्यूग्ररोगायनुदेपुरस्तान् ।**

**अर्हन् मुखान् पंचपदान् शरण्यान्, लोकोत्तमानमांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य वेदी शुद्धिविधान ऽ र्हत्सिद्धाचार्योपाध्याय सर्वसाधु मंगल लोकोत्तम शरणेभ्यो जन्मजरामृत्यु विनाशनाय जलं निर्वपामीति स्वाहा ।

**सच्चंदनैर्गन्धहृतालिवृन्दैः, चितैहिमांशु प्रसरावदातैः ।**

**अर्हन् मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य---भवाताप विनाशनाय चंदनं... ।।२।।

**सदक्षतैर्मौक्तिक कांतिपाटै :, चरै सितैमानसनेत्रमित्रैः ।**

**अर्हन् मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य अक्षयपद प्राप्त्यै अक्षतान्..... ।।३।।

**पुष्पैरनेकैर्रसवर्णगंधैः प्रभासुरैर्वासित दिग्वितानैः ।**

**अर्हन् मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य कामबाण विनाशनाय पुष्पं ... ।।४।।

**नैवेद्यपिण्डैर्घृतशर्कराक्तै – र्हविष्य भागैः सुरसाभिरामैः ।**

**अर्हन् मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं हीं अद्य .... क्षुधारोगविनाशनाय नैवेद्यं...।।५।।

**आरर्ति कैर्रत्नसुवर्णरूक्म पात्रार्पितैर्ज्ञानविकाशहेतोः ।**

**अर्हन मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य वेदी शुद्धिविधान ऽ र्हत्सिद्धाचार्योपाध्याय सर्वसाधु मंगल लोकोत्तम शरणेभ्यो मोहान्धकार विनाशनाय दीपं निर्वपामीति स्वाहा ।।६।।

**आशासुयद्धर्म वितानमृद्धै – तैर्धूपवृन्दैर्दहनोपसर्पैः।**

**अर्हन मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य वेदी शुद्धिविधान ऽ र्हत्सिद्धाचार्योपाध्याय सर्वसाधु मंगल लोकोत्तम शरणेभ्यो अष्टकर्मदहनाय धूपं निर्वपामीति स्वाहा ।।७।।

**फलैर्रसालैर्वर दाडिमाद्यै – र्हद्घ्राणहार्यै – रमलैरूदारैः ।**

**अर्हन मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य वेदी शुद्धिविधान ऽ र्हत्सिद्धाचार्योपाध्याय सर्वसाधु मंगल लोकोत्तम शरणेभ्यो महामोक्षफलप्राप्त्यै फलं निर्वपामीति स्वाहा ।।८।।

**द्रव्याणि सर्वाणि निधाय पात्रे ह्यनर्घमर्घं वितरामि भक्त्या ।**

**अर्हन मुखान् पंचपदान् शरण्यान्, लोकोत्तमान्मांगलिकान्यजेऽहं ।।**

ओं ह्रीं अद्य वेदी शुद्धिविधानऽर्हत्सिद्धाचार्योपाध्याय सर्वसाधु मंगल लोकोत्तम शरणेभ्यो अनर्घ्यपदप्राप्त्यै अर्घ्यं निर्वपामीति स्वाहा ।।९।।

**अनादि सन्तान भवान् जिनेन्द्रानर्हत्पदेष्टानुपदिष्ट धर्मान् ।**

**द्वेधाश्रियालिंगितपादपद्मान्, यजामि वेदीप्रकृतिप्रसत्यै ।।१।।**

ओं ह्रीं उद्भिन्नान्त ज्ञानगर्भस्ति संदृष्ट लोकानुभावान मोक्षमार्ग प्रकाशनानन्तचिद्रूप विलासान् अर्हत परमेष्ठिन: संपूजयामि स्वाहा ।।१।।

**कर्माष्टनाशाच्चयु भावकर्मोद्भूतोन्निजात्मस्वविलासभूपान् ।**

**सिद्धाननन्तांस्त्रिक कालमध्ये गीतान्यजाम्यष्टविधि प्रशक्त्यै ।।२।।**

ओं ह्रीं द्विविधकर्ममलरहित लोकाग्रशिखरावस्थायिन: सिद्ध परमेष्ठिनोऽर्चयामि स्वाहा ।।२।।

**ये पंचधाचार परायणानां अग्रेसरा दीक्षणशिक्षिकासु ।**

**प्रमानिर्णीतपदार्थसार्थान् आचार्यवर्यान् परिपूजयामि ।।३।।**

ओं ह्रीं व्यवहाराधारचारक्त्वाद्यनेक गुणमणिभूषितोरस्कान् संघप्रतिसार्थवाहानाचार्यवर्यान् परिपूजयामीति स्वाहा ।।३।।

**अर्थश्रुतं सत्य विबोधनेन द्रव्यश्रुतं ग्रन्थ विदर्भनेन ।**

**येऽध्यापयन्ति प्रवरानुभावा: तेऽध्यापका मेऽर्हणया दुहंतु ।।**

ओं ह्रीं द्वादशाङ्ग श्रुताम्बुनिधि पारंगतान् परिप्राप्तपदार्थ स्वरूपानुपाध्याय परमेष्ठिन: संपूजयामीति स्वाहा ।।४।।

**द्विधा तपोभावनया प्रवीणान् स्वकर्मभूवीध्रविखंडनेषु ।**

**विविक्तशय्यासनहर्म्यपीठ – स्थितान् तपस्विप्रवरान यजामि ।।**

ओं ह्रीं घोरतपश्चरणोद्यत प्रयास स भासमानन् स्वकारूण्यपुण्य पुण्य गण्यपण्यारत्ना्

लंकृतपादान् साधुपरमेष्ठिनः संपूजयामि स्वाहा ।।५।।

– आर्या –

**अर्हन्मंगलमर्चे सुरनरविद्या धरैकपूज्यपदं ।**

**तोयप्रभृतिभिरर्घ्यै – र्विनीतमूर्धा शिवाप्तये नित्यं ।।**

ओं ह्रीं अर्हन्मंगलाय नमः अर्घ्यं ।।६।।

**ध्रौव्योत्पादविनाशो रूपाखिलवस्तुजनानर्थकरं ।**

**सिद्धं मंगलमिति वा मत्वार्चे चाष्टविध वस्तुभिः ।।**

ओं ह्रीं सिद्ध मंगलाय नमः अर्घ्यं निर्वपामिती स्वाहा ।।७।।

**यद्दर्शनकृतविभवा द्रोगोपद्रवा मृगेव मृगेन्द्रात् ।**

**दूरं भजंति देशं साधुभ्योऽर्चते विधिना ।।**

ओं ह्रीं साधु मंगलाय नमः अर्घ्यं ।।८।।

**केवलिमुखावगतया वाण्या निर्दिष्ट मेदधर्मगणं ।**

**मत्वा भवसिंधुतरीं प्रयजे तन्मंगलं शुद्धयै ।।**

ओं ह्रीं केवलिप्रज्ञप्त धर्ममंगलायार्घ्यं ।।९।।

**लोकोत्तममय जिनराट् पदाब्जसेवामित दोष विलयाय ।**

**शक्तं मत्वा घृत जल, गंधैरर्चेसमीड् प्रभवे ।।**

ओं ह्रीं अर्हल्लोकोत्तमाय अर्घ्यं ।।१०।।

**सिद्धारचुतदोषमला लोकाग्रं प्राप्य शिवसुखं व्रजिता ।**

**उत्तमपथगा लोके तानर्चे वसुविधार्चनया ।।**

ओं ह्रीं सिद्ध लोकोत्तमाय अर्घ्यं ।।११।।

**इन्द्र नरेन्द्र सुरेन्द्रैरर्थिततपसां व्रतैषिणां सुधियाम् ।**

**उत्तममध्वानमसावर्चेऽहं सलिलगंध मुखैः ।।**

ओं ह्रीं साधु लोकोत्तमाय अर्घ्यं ।।१२।।

**रागपिशाचादिमर्दनमत्र भवे धर्मं धारिणामतुलम् ।**

**उत्तममपगत कामो वृषमर्चे शुचितरं कुसुमैः ।।**

ओं ह्रीं केवलिप्रज्ञप्त धर्म लोकोत्तमाय अर्घ्यं ।।१३।।

अर्हच्छरणमथार्चेऽनन्त जनुण्यपि न जातु संप्राप्तम् ।
नर्तनगानादिविधि मुद्दिश्याष्ट कर्मणां शांन्त्यै ।।

ओं ह्रीं अर्हच्छरणाय अर्घ्यं ।।१४।।

निर्व्याबाधगुणादिक प्राग्र्यं शरणं समेतचिदनन्तम् ।
सिद्धानाममृतानां भूत्यै पूजेयमशुभहान्यर्थम् ।।

ओं ह्रीं सिद्धशरणाय अर्घ्यं ।।१५।।

चिदचिद्भेदं शरणं लौकिकमाप्यं प्रयोजनातातिम् ।
त्यक्त्वा साधुजनानां शरणं भूत्यै यजामि परमार्थम् ।।

ओं ह्रीं साधुशरणाय अर्घ्यं ।।१६।।

केवलिनाथमुखोदगत धर्मः प्राणिसुखहितार्थमुद्दिष्ट ।
तत् प्राप्त्यै तद्यजनं कुर्वे मखविघ्ननाशाय ।।

ओं ह्रीं केवलिप्रज्ञप्तधर्म शरणाय अर्घ्यं ।।१७।।

(अत्र लवंगकैरष्टोत्तरशतं 'ओं ह्रीं चतु:षष्ठि ऋद्धिसमृद्ध गणधरेभ्यो नमः'। इस मंत्र को या – ओं ह्रीं अप्रतिचक्रे फट् विचक्राय झ्रौं झ्रौं स्वाहा । इस मंत्र की १०८ जाप्य करनी चाहिए)

# अथ महर्षि पर्युपासनम्

**(प्रदिशन्तु बोलने पर पुष्पांजलि छोडे)**

औषधीरसबलर्द्धि तपःस्थाः क्षेत्रबुद्धिकलिताः क्रिययाढ्याः ।
विक्रियर्द्धिमहिताः प्रणिधान प्राप्तसंसृतितटा मुनिपूज्याः ।।
केवलावधिमनः प्रसराङ्गा बीज कोष्ठमति भाजन शुद्धाः ।
वीतराग मद मत्सरभावा बोधिलाभमनद्यः प्रदिशन्तु ।।
यद्वचोऽमृतमहानदमग्नाः जन्मदाह परितापमपास्य ।
निर्ववुः सुखसमाजतटेषु बोधिलाभमनद्यः प्रदिशन्तु ।।
श्रोतृभिन्नमतयः पदपंथा दृष्ट संसृति पदार्थविभावाः ।
तत्त्वसंकलित धर्म्यसुशुक्लाः बोधिलाभमनद्यः प्रदिशन्तु ।।

स्पर्शनश्रवणलोकनबुद्धा घ्राणसंस्थरसनोपकृता ये ।
दूरतोऽप्यनुभवंहिसमाप्ता बोधिलाभमनद्यः प्रदिशन्तु ।।
छिन्नस्वर्यविधिना चतुर्दश दिग्सुपूर्वमतिना निमित्तगाः ।
वादि बुद्धि कृतिनोमतिश्रमाः बोधिलाभमनद्यः प्रदिशन्तु ।।
अष्टधोक्तदशधाभिदया ये बुद्धिवृद्धिसहिताः शिवयात्राः ।
विण्मलादिगदहापनदेहाः बोधिलाभमनद्यः प्रदिशन्तु ।।
दृष्टवक्त्र मनसा विषभक्ति प्रीणिताः श्रुत् सरित् पतिपुष्टाः ।
लोक मंगलिषु सन्यसिता ये बोधिलाभमनद्यः प्रदिशन्तु ।।
वाक्यमानसबलेन समग्रा उग्रदीप्ततपसस्त्रिक गुप्ताः ।
घोरवीर्यगुण भावित चिन्ताः बोधिलाभमनद्यः प्रदिशन्तु ।।
दुग्धमध्वमृतभोजन कृत्वा सर्पिरास्रविक्चोऽ भिनियुक्ताः ।
अण्वलाघववशित्व विदर्भाः बोधिलाभमनद्यः प्रदिशन्तु ।।
कामरूपगुरूता प्रतिसर्पान् तदर्धानवसतिगृह युक्ताः ।
चारणाजल फलाग्निकसूत्राः बोधिलाभमनद्यः प्रदिशन्तु ।।
आत्मशक्ति विभवागतसर्व – पौद्गलीयममताश्चुतवस्त्राः ।
सत्परीषहभटार्दनदास्ते बोधिलाभमनद्यः प्रदिशन्तु ।।

**ओं ह्रीं अष्टप्रकार सकलर्द्धि प्राप्तेभ्योऽर्घ्यं निर्वपामीति स्वाहा।**

– वसंत तिलका –

आधेशितुर्वृषभसेन पुरस्सरा ये ।
सिंहादिसेन पुरतोऽजिततीर्थभर्तुः ।।
श्री संभवस्य किल चारुविसेन मुख्याः।
तुर्यस्य वज्रधरमुख्यगणाधिराजः ।।
कोक ध्वजस्य चमराधिपपूर्वगास्युः ।
पद्मप्रभस्य कुलिशादिपुरः स्थिताश्च ।।
श्री सप्तमस्य बलमुख्यकृताः पुराणे ।
चन्द्रप्रभस्य शमिनः खलुदत्तमुख्याः ।।

मकरांकितो गणभृतश्चविदर्भमुख्या ।
